मधुमत्याख्या काव्यप्रकाशटीका

५६५

१६ पन्नानि

न च विभागो विशेषलक्षणं च व्यंजनां विना नोपपद्यते। न च वाचकलौकिकलाक्षणिकाभ्यामन्यः शब्दो वाच्यलक्ष्याभ्यामन्यो वार्थोऽस्तीत्यत आह। क्रमेणेति। स्वरूपं
निर्धार्य यन्नेव विभजते। स्याद्वाचक इति। अत्र विभागादेव त्रिविधत्वलब्धौ त्रिधेति न्यूनाधिकसंख्याव्यवच्छेदाय व्यंजनास्थापनेन न्यूनत्वस्य गौण्युपचारयोर्लक्ष
णांतर्भावेणाधिकत्वस्य निरासादिति तात्पर्यं। अत्र लक्षणायाः शक्तौ न तथा व्यंजनायाश्च तदुभयमूलत्वेन प्राप्तक्रमेणोद्देशाद्दस्य बुध्येयं। यद्यपि वाचकस्यैव ला
क्षणिकत्वाद्व्यंजकत्वाच्चेति विभागोयमनुपपन्नः। तथापि वृत्तिविभागद्वारा शब्दविभाग तात्पर्यं। नन्वन्यत्र व्यंजनाया नामापि नास्तीत्यत आह। काव्य इति।
तथा च व्यंजकशब्दस्यापि प्रामाणिकत्वान्न विभागविलक्षणयोरनुपपत्तिरिति भावः। यद्वा। योन्यत्र वाचको लाक्षणिकश्च स एवात्र काव्ये व्यंजक इति त्रिधा
शब्दः स्यादित्यर्थः। विभक्तेन लक्षणं वक्तुमुचितं ननु तदुक्तं घ्यार्थस्वरूपमुच्यनाद्यत आह। एषामिति। एषामिति। स्वरूपं लक्षणमित्यर्थः। तथा च त्रिष्वर्थादि
सानुरोधेनेदानीमेव तदुच्यत इत्यर्थः। अर्थोपि विभजते। वाच्यादय इति। नन्वर्थानां वाच्यलक्ष्यव्यंग्यात्मकत्वोद्वाच्यस्य च वाच्यादित्वाभावाद्वाच्यादी इतिस्या
न्न तु वाच्यादय इति चेन्न। वाच्या आदयो येषां लक्ष्यव्यंग्यानां ते तथा तथा च व्यक्तिभेदमादाय न विरोधः। तद्गुणसंविज्ञानबहुव्रीहिस्वीकाराच्च न वाच्यानन्वयः। न्यून
त्वमाशंक्याह। तात्पर्यार्थोपीति। तथा च सार्वत्रिकत्वान्न तत्समशीधिकया विभाग इति भावः। कोसावित्यत आह। आकांक्षेति। इह हि द्विविध आत्माभिप्रायः। पदे
वाक्ये च। तत्राद्यो यस्माल्लुप्तोदयमर्थो नोद्बुध्यत इत्याकारो। द्वितीयस्तु मिथः साकांक्षासन्नयोग्यप्रतियोगिकसंसर्गोपरमिदं वाक्यमित्येवंरूपः। तत्राद्यप्रथमः प
दशक्तिरभिधा। द्वितीयस्तु वाक्यशक्तिस्तात्पर्यमित्युच्यते न त्वत्रापि चालभ्यो वाच्योर्थस्तात्पर्यलभ्यस्तु तात्पर्यार्थः। यद्यपि पदशक्तेर्वाक्यशक्तिर्नाधिका। तथा
प्याकांक्षादिसहकारिणी पदशक्तिरेव तथा व्यवह्रियत इति। विशेषवपुर्घटनयनादिरूपः। अभिहितान्वयवादिनामिति। बहुवचनेन गौरवं प्रतिपादयति।
असार्वत्रिकत्वं दर्शयति। वाच्य एवेति। अन्विताभिधानवादिनो मतमित्यनुषज्यते। अत्रैकवचनेन पूर्वमतापेक्षया लाघवमाविष्क्रियते। तदेतत्सर्वं पंचमोल्ला
से स्फुटीभविष्यति। अर्थव्यंजकत्वमाह। सर्वेषामिति। यद्यप्युद्देशक्रमानुरोधेन शब्दव्यंजकत्वमभिधायार्थव्यंजकत्वमभिधातुमुचितं तथापि शब्दव्यंज
कत्वं वर्णादिष्वेव दृष्टमर्थव्यंजकता तु न दृष्टास्तीति असंभावितत्वशंकामात्रमपनेतुमिदमुक्तं। ननु प्राधान्येनार्थव्यंजकोपदर्शनमतएवाग्रे शब्दव्यंजक
त्वमुदाहृत्यार्थव्यंजकतोच्यत इति सूत्रकारो वक्ष्यति। व्यंजकत्वमपीत्यत्रापि नाव्यंजकतादशायामपि तत्तदर्थानां वाच्यत्वादयः प्रच्यवन्त इत्यभिधीयते। केचि
त्तु शब्दोभिन्नक्रमोऽर्थानामित्यत्रान्वेति। तथा चापि नाशब्दव्यंजकत्वं समुच्चीयत इत्याहुः। भाव इति। अत्रेति। अयं चार्थस्तात्पर्यव्यंग्यः न चैवं वाच्यस्य प
धत्यादिविरोधः। पदार्थसंसर्गरूपतात्पर्यार्थस्य व्यंजकत्वे संबंधिनः पदार्थस्यापि व्यंजकत्वात्संबंधिनोऽभाने तत्संबंधाभानात्। अतएव व्यंजना
प्राधान्येनोक्ताः। अन्वयाभानेपि पदार्थानां तद्व्यंजकोदाहरणेपि तात्पर्यार्थव्यंजकत्वोदाहरणालाभेन सर्वेषामित्यादिविरोधापत्तेः। प्राधान्येन

५

उपदार्थानां व्यंजकत्वं काव्य इत्यत्रोनुसंधेयं। साहनीति। आसतीत्यर्थः। सरिसर्वं सद्धाके। मत्के ते सुत्तगं शासदीति संबंधः। अत्रेति। अ
यमप्यर्थः सर्वन्यायेन तात्पर्यविषय एव। ननु यत्र वाक्यार्थो बाधोपि वक्रादिवैशिष्ट्यं यां पायधिका शब्दत्रासां कथंपि यत्र वाक्या
र्थो बाधितस्तत्र निःशेषकृते त्वाशे वाच्य लक्ष्ययोर्व्यंजकत्वे सांकर्यं वाक्यार्थबाधस्योक्तयत्रापि तु ज्यत्वादिति वेतानाम्। न सर्वं व्यंजक
त्वस्थले पदार्थस्यापि बाधात्। अत एव लक्षणामूलव्यंग्ये अविवक्षितवाच्यत्वमभिधामूले तु विवक्षितवाच्यत्वं चतुर्थे विव
ते। न अहति। शांरवश्रु किंमुकाश्रुकिंः। अयचेति। सर्वत्र संतो गोऽनु विप्रलंभोपकः। वचनस्य स्फुटत्वात्। व्यंग्यो वरनुसमान
मितिपक्षयोर्भेदः। प्रस्तावसरमाह वाचकादीनामिति। स्वरूपं लक्षणं। साक्षादिति। अभिधया प्रतिपादयति न त्वभिधयाप्रतिपा
दयतीत्यर्थः। अभिधायां वाचकशब्दव्यापारत्वे नान्योन्याश्रयादाताव तएव समयत्के शोववैयर्थ्यं च। साक्षात्त्वं चार्थात्वरप्रवी
तिमध्यारीकृतसमव्यायकत्वं। असाक्षात् हृदयमर्थो बोद्धव्य इत्याकारश्चाघातिप्राय इह संकेतः न त्वीश्वरात्तिप्रायमात्रं स्वानावि
कः संबंध एव वा। यदृच्छोशशब्दवान्नेः। संकेतितश्चतुर्भेद इत्यनेन तस्यापि संग्राह्यत्वकथनात्। एवं च संकेतितार्थप्रतिपादक
त्वं जात्यातिकशब्दस्यापीत्यतज्जकं साक्षादिति। तावन्मात्रे च घटादिपदे संबंधितयाकाशाकारके त्यक्तीत्यतज्जकसंकेतितमि
ति। शब्दत्वे न च विशेषणान्नु चेष्टायामतिव्याप्तिः। पितृवरलाशक्ता। तदूर्जोस्ति विकल्पस्तत्र यथा लक्षणाश्रयत्वं लाक्षणिक
त्वं तथात्राप्यभिधाश्रयत्वमेव वाचकत्वं। न चान्योन्याश्रयः। संकेततत्तिन्नायामभिधायां मानात्वेन तस्याः स्तव्यापारत्वासिद्धेः।
न चाकरविरोधः। तत्कार्यकारित्वपुरस्कारेण सहकारिति व्यापारपदप्रयोगात्। अत एव वृत्तिकारः संकेतसहायत्वमाह शा
।ब्दस्य। तावन्मात्रं च लाक्षणिकत्वदशायामप्यस्तीति प्रकृतकर्मेण्याभिधानात्। तदर्थश्च शब्दस्य साक्षात्प्रतिपादकत्वमिति पदार्थ
। त्वया शक्योपस्थितिरिति परपूर्यातत्वं जात्यादिकस्यापीत्यकं साक्षादिति। व्यंजकत्व यस्या व्यवधाने नेसंकेतोऽहति दृष्टान्त
। त्साक्षात्संकेतितो योर्थस्तत्प्रतिपादकत्वं लक्षणं। संकेतश्चाभिप्रायः। लक्षणायां उपरं परासंकेतः। आकांक्षाबोधयिवाल
।। इत्थं बोधयत्विल्पत्तिप्रायेण लाक्षणिकपदप्रयोगात्। व्यंजनायामभिप्रायनियमो नास्त्येव यत्राप्यस्ति तत्र परंपरयेति क्रमः।
र्या ।। ननु संकेतितार्थज्ञाने तत्प्रतिपादकत्वेन लक्षणाज्ञानमसंभवीत्यत आह संकेतितेति। न चानयनादिव्यवहारः शक्तिग्राहकः सेव
। व्यक्तावेवेति तत्रैव शक्तिरुचितानुजात्यादाविति तत्राह यद्यपीति। यदि यत्र शक्तिग्रहस्तत्र शाब्दधीस्तदा तासु शक्तिग्रह
सा वा दृष्टहीत शक्तिके शाब्दधीर्न स्यात्। प्रधान्यत्र शक्तिग्रहोऽन्यत्र शाब्दज्ञानं तदा शक्तिधीः शाब्दज्ञाने व्यभिचारिणीत्यर्थः।
दूषणान्तरमाह गोः शुक्ल इति। तथापि गोत्व [illegible] त्वात्। यत्र धर्म इति। रवाता। विकवस्त्वथम इ

त्यर्थः। वक्रिक्रिति। वकूपदछो पाधिकइत्यर्थः। वस्तुधर्मोपि तिा अनेनजातिगुणयोः क्रियातो भेदो दर्शितः। साध्यत्वं चाख्यातार्थानिर्दि
तत्वं। यदाहुः। कालानुपातियद्रूपं धात्वर्थस्य क्रियेतितत्। सर्वतोथत्परिच्छिन्नं तद्भाव इतिकथ्यतइति। एवं सक्रमजातिव्यापारस
मुदायोधात्वर्थइत्येकदेशात्वयेपिसंमुदायमाश्रित्यसाध्यत्वप्रतीतिः तएवक्रमवत्वात्क्रियेत्युच्यते। तदुक्तं। यावत्सिद्धमसिद्धंवा
साध्यत्वेनप्रतीयते। आश्रितक्रमरूपत्वात्साक्रियेत्यभिधीयते इति कश्चित्। वस्तुतोमीमांसामतेक्रियाएकैवक्रमवत्तावद्व्यापारसोपा
नक्रमाद्क्रमोपचारइतितत्वं। प्रातःप्रदइति। प्रातःप्रदइवप्राणप्रदः। अनेनाश्रमनपायीत्यर्थः। नयगुणनित्यतापक्षेतत्राप्तिव्याप्तिरि
विधायं। पाकादिनाघटादौतस्याप्यपगमात्। अपगमश्चानित्यतापक्षेसर्वथाभावोऽनित्यतापक्षेध्वंसइत्यन्यदेतत्। इत्यापगमा
पगमवतएववैयाकरणमतेगुणत्वात्। उक्तंहीति। मतृहरिणेतिशेषः। शुक्लादिनाहीति। ननुयथागोत्वादिनालक्षसत्ताकंवस्तु
नीतः शुक्लइत्यादिनाप्युगुणोनविशिष्यतेतथाशुक्लादिनालक्षसत्ताकंवस्तुगोहंसइत्यादिनाजात्यापिविशिष्यतइतिवेलक्षण्यं
तामगुणोनावृद्धकपगमादाघत्वेगुणत्वंतयालक्षसत्ताकत्वाभावात्। यद्वास्वाश्रयएवविशेषकत्वं विशेषकत्वमिहविवक्षितं
नचयथाशुक्लोगुणआमपाकदशायांघटत्वादिनालक्षसत्ताकस्वाश्रयंनीलोयमितिविशिनष्टितथागोत्वादिकमपिश्यामतादूर्व
परीत्तावयवइति। अवयवइयावयवत्वाश्रयइतियावत्। सत्याधिश्रयणाधवतारणापर्यंतः क्रियाकलापः। एवंवतत्तआश्रयाक्रियाले
ष्यतइत्यर्थः। केचित्तुद्रवपरीत्तोधिश्रयणादिरवयवोजनकोयस्येतिविग्रहेतत्प्रतिभाचेतायोजयंतिायइष्टौ। तत्कुनुपाधिंव्याचष्टे
ष्यतइत्यर्थः। केचित्तु ... चरमबुद्धा
द्विस्थादीनामिति। यद्यप्यत्रचवर्णाएवोपाधयस्तथाप्याशुविनाशिनांतेषामयप्रत्याय्यकत्वाभावादन्यथाव्याचष्टे अंत्येति। चरमबुद्धा
स्फुटतरथाह्यतेनवर्णान्तरबुद्धेरपिव्यंजकत्वं। अतएववयगान्तरस्फोटबुद्धौतारतम्यं। संहृतक्रममेकं। यदेकत्वादेकपदमितिप्रा
तीतिः। सएवचोपाधिः। सचडित्थादिशब्दजन्यज्ञानेभासते। यथाजात्यादिशब्दानांजात्याद्यमुतीतिस्तथायदृच्छाशब्दस्यस्वस्मि
न्नशक्तिः। व्यक्तिगुणक्रियाश्रयसंततिनानुगतत्वेनयानुमानेनयोपस्थितिरतएवगोशुक्लइत्यादिसामानाधिकरण्यमपिसंगच्छते।
नचस्फोटस्यजात्यादिशब्दसाधारण्यात्तेदकत्वमितिवाच्यं। उपाधित्वेनैवासाधारण्यात्। जात्यादिशब्देषुस्फोटसत्त्वेपिजात्याद
रेवोपाधितयातस्यानुपाधित्वात्। शब्दस्यचतन्मतेद्रव्यतयायदृच्छाशब्देद्रव्यमुपाधिरित्युच्यते। ननुपरमाणुपरिमाणस्यानुपाधितया
पदार्थज्ञानप्रदत्वेनतच्छायकपदस्यजातिशब्दत्वमुचितंतत्कथंगुणशब्दतान्यवहारइत्यतआह परमात्वादीनामिति। पारिता
षिकंवैशेषिकोक्तं प्रायसिद्धंवस्तुतोमन्मतेजातिशब्दत्वमेवतस्येत्यर्थः। ननुगुणादीनांनानात्वेनशक्यतावच्छेदकानन्त्यम्व्यभिचारता
दयस्यापकत्वेतेदप्रतीतिरनुपपन्नेत्यतआहतत्पतिा एकैका एवहिनीलारुणादिव्यक्तयः। क्रियाप्येकैवयथाहितत्तदर्णानुग

तः स्फोट एक एव तथाधिश्रयणादि तत्तद्व्यापारव्यंग्यात शब्दव्यापारानुगता क्रियाप्येका॰ अत एवैकव्यापाराभावे विपचतीत्यादिप्रत्य
यप्रयोगो युज्यते॰ अन्यथा शुचिनाशिनां तेषां मेलकाभावान्नोन स्यात्। अत एव व्यंजकव्यापारक्रममुपादाय क्रमवती क्रियेत्यु
च्यते। स्फोटस्यैकत्वं साधितमेव। एवं सति भेदबुद्धिमुपपादयति॰ आश्रयभेदादिति। तथा च तु तात्स्य द्रव्यमाश्रयः क्रियाया व्या
पारकलापः स्फोटस्या विचूर्णसमुदायस्तद्भेदोपाधिकी तेषु भेदप्रतीतिरिति भावः। अत एव समुचितं दृष्टान्तमाह यथेति। मर्दा
लरमाहहिमपय इति। प्रातिस्वं भिनत्ति। एतद्व्यं तन्मते शाब्दार्थयोरत्तेदाद्व्यवसेयं तद्यानिति। जातिमानि किंत्यर्थः। अपोहे वे
ति। अत एवा वृत्तिरित्यर्थः। गुरुरपि प्रयोजनवान्निरूप्य तद्व्यतमाह प्रकृतानुपयोगादिति। व्यंजनायां तद्विवेचनस्यानुपयोगा
दित्यर्थः। मुख्यो व्यापार इति। अत्तिधासंकेतः। व्यापारपदं वृत्तिपरं न तु शक्तत्वाचना रूपात्तिधेति भ्रमः कर्तव्यस्तस्या विधिष्ठ
त्पय एवोपगमात्। अत्र साक्षात्संकेतितार्थविषयत्वं शब्दव्यंजकव्यस्थले व्यंजनायामुपादानलक्षणास्थले लक्षणायामप्य
स्तीति मुख्यपदोपादानं मुख्यत्वं च व्यापारान्तरानुपजीवकत्वं लक्षणादेरभिधोपजीवकत्वात्। साक्षात्संकेतित इति। अस्माच्छ
ब्दादयमर्थो बोद्धव्य इत्याद्यभिप्रायविषय इत्यर्थः। अस्माच्छब्दादमुमर्थं बुध्यतामयमर्थो ज्ञातव्य इत्यभिप्राय एकपरं परासंकेतः। य
थार्थं लक्षणायां॰ तत्राह गंगाशब्दः स्वार्थं बोधयित्वा तीरं बोधयतीति। सन्निहितस्य मुख्यार्थस्य भ्रमं निवारयति शक्यस्येति। लक्ष
णेति करावृक्षस्वरूपं विवेचयितुं लक्षणं तावद्विवेचयति मुख्यार्थबाध इति। अत्र यइत्यर्थे यदित्यव्ययं। तथा च योऽन्यार्थो लक्ष्यते अ
तिपाद्यते सा लक्षणेत्यन्वयः। ननु लक्षणायोग्यतरत्यर्थः आत्माश्रयात्। यद्यपि सलक्षणे विवक्तुमर्हति तथापि सवृत्तिनामशक्यत्।
नां विधेया दीपवाचकसाक्षान्यतरं लिंगमाह कर्त्वंपकत्वमिति। सिद्धान्तितिविधेयवाचकलक्षणाशब्दस्य स्त्रीलिंगत्वात्संप्रकेत अ
त एवाधारोऽधिकरणमिति स्वस्य आधारस्तादधिकरणमिति व्याख्या नष्ठुकं। यद्यपि वेयमविधेयं दापरामृष्टस्य प्रतिपाद्यस्यत
दापरामर्शे तत्र लक्षणाविधानमनुपपन्नं तथापि सम्बित्रोणयोहीति न्याये न तत्प्रतिपादनपर्यवसानं। मुख्यार्थबाधो शक्यार्थबो
धकोनन्वियावनानुपपत्तेः रूढिलक्षणा मूललक्षणायाः संग्रहः। अन्यथा कुशलेन शब्दस्य कुशादानकर्तरि शक्त्यभावात्संग्रहो न स्यात्।
अन्वयानुपपत्तिर्वक्तात्पर्यानुपपत्तिर्द्वष्टव्या तेनोपादानलक्षणासंग्रहो भवति। तथा च मुख्यार्थबाधतद्योगाभ्यां मशक्यार्थप्रा
तिपत्तिर्लक्षणेति प्राञ्चः। नव्यास्तु यदित्यव्ययं यस्मादित्यर्थे। तथा च यस्मादन्योऽर्थः प्रतिपद्यते सा लक्षणेत्यर्थः। शुक्रश्चायं अन्व
य प्रतियोग्युपस्थित्यर्थं वृत्तिकल्पनात्। तथा च शक्यसंबंध एव लक्षणा। नव्यास्त्विथं पाविनाभूतेत्यभिग्रंथविरोधः। कारणाक
त्पत्या प्रतीतिः शब्दस्य तत्रैव विश्रामात्। अत एव तद्रूढलक्षणेति कारिकायां इत्कपसंजहार सूत्रकारः। इति कृतोपक्रमं। आरोपे विताकि
वा आरोपितः शब्दव्यापार इति। उपाश्चिते लक्षणात्वे आरोपितो व्यापार इत्येव साधु ज्जप। स्थिते व्यापारत्वाभावात्। न च शाक्या

संबंधस्य लक्षणात्वे तद्योग इत्यर्थः। मुख्यार्थबाधतद्योगयोर्लक्षणापत्तौ मनुकूलत्वे समानेपि मुख्यार्थबाधो मुख्यार्थान्वयप्रति
बंधद्वारा शक्यसंबंधस्तु साक्षादेव तदुपस्थापक इति स एव लक्षणेति प्रतिपादनार्थत्वात्। न चैवमपि हेतुतावान्तर्लक्षण
इति अनंतरोक्तेन मुख्यार्थबाधादित्रयं हेतुरिति पंचमी। द्वयोः केनचिद्विरोधः। नहि शक्यसंबंधे धात्वाद्ये शक्यसंबंधात्वायोनयाश
क्यसंबंधे सहेतुघटित इति वाच्यं। प्रयोजनं न लक्षणाजन्यज्ञानविषयो हेत्वत्तावादिति प्रथमस्यनाभिधा समयात्तावादित्यत्र
साध्याभावे। शिष्टप्रयोगेन प्रयोजनं नाभिधाजन्यज्ञानविषय इत्युपस्थापयन्वाख्यात्। मुख्यार्थबाधरूढिप्रयोजनरूपहेतुत्रय
सापेक्षत्वे द्वितीयस्य तात्पर्यात्। वक्ष्यतो लक्षणापदस्य तावकरणव्युत्पन्नतया क्वचित्किंचिदुपलक्ष्यता अभिधानमिति न क्षति
परविरोधो वृत्तितानुकरणव्युत्पत्तिमूलत्वेनोचितत्वं। रूढितो वा प्रयोजनादिति विभागो न तु लक्षणाप्रविष्टं प्रत्येकसमुदाया
भ्यामव्याप्त्यसंभवयोः प्रसंगात्। ननु मुख्यार्थं बोधयित्वा विरते शब्दे पश्चाद्दूर्ध्वस्तीरं प्रतिपादयतीति अर्थव्यापारोयं न शब्दस्यैत्य
तआह आरोपितेति क्रियेति। अर्थव्यापार एव शब्दे आरोप्यत इति लाक्षणिकः शब्द उच्यत इति भावः। अस्मत्पितृचरणास्तु।
व लाक्षणिकमपि पदमनुवर्त्य आरोपितत्वोक्तिरुक्तसाक्षात्संबंधाभावनिबंधनेति तर्कदृष्ट्याभाकुः। सूत्रं व्याचष्टे कर्मणीति इर
त्यादिकर्मणीत्यर्थः। संध्यावंदनादौ योगार्थस्याप्यन्वयात्। एवं च कुशलपदं योगरूढं। अयं तु विशेषः। पंकजपदापेक्षया कु
शलशब्दस्य योगार्थे प्रयोगबाहुल्याभावः। योगार्थे सं उपपदस्येव पंकजपदे योगो निप्रसक्तो रूढ्या नियम्यते। अत्र तु रू
ढियोगौ द्वावप्यतिप्रसक्तावितिमिथो नियमनं। न च कुशलपदस्य योगरूढत्वे योगार्थस्यापि भानं स्यादिति वाच्यं। अव
यवव्युत्पन्नस्य तद्भानात्। तदव्युत्पत्तिदशायां तदभानस्य पंकजादिसाधारणत्वात्। अन्यथा लक्षणापि न स्यात्। अत एव यो ५८
गार्थेऽव्युत्पत्तेः प्रयोग इति प्रयोगबाहुल्यानुरोधेन रूढ्यर्थे लक्षणा। न चैवं रूढ्यर्थनिपुणव्यवस्थान्वये न किंचिद्बाधकमिति लक्ष
णानस्यादिति वाच्यं। व्युत्पत्तिवचनान्यायेन योगार्थोपस्थितयोपस्थितस्य निराकांक्षतयाप्यतंत्रोपस्थितये तदपेक्षणात्। सा
ज्ञात्युपपत्तेस्य लक्षणालिनादौ पंकजादिपदस्येव। अत एव योगार्थमात्रपरतया कुशलपदप्रयोगेपि लक्षणैव शैवलादौ पंकजप
दस्येव। इह तु तत्परतया प्रयोगस्य निरूढत्वाद्व्यापत्तिसंयेनाकत्वादनात्। अत एव प्रयोजनभूम्न्येपि लक्षणा नेयार्थव्यापत्ति
सूयेनकाव्येनादृप्यते। न चैवं रूढितो वा प्रयोजनादित्युपन्नं। काव्योपयोगि लक्षणापरत्वेन तथाभिधानात्। न च प्रयोजनभू
म्न्येपि यदि लक्षणा तदा काव्येपि तज्ज्ञानं न स्यादिति वाच्यं। यत्र मुख्यशब्दाभिधाने न प्रतिपिपादयिषितप्रयोजनप्रत्ययस्तत्र प्रयो
जनभूम्न्यापि यत्रानुगतधातत्र लक्षणायां प्रयोजननियमात्। न चैवं नाममात्रस्यैव धातुसमुच्चयव्याख्यापदादेरपि लाक्षणिकत्वा

अ५

पत्तिः। श्रोत्रादिकप्रत्ययानां प्रयोगमात्रसाध्यानां निरर्थकत्वात्। संप्रदायविदस्तु। योगार्थ एवमुक्तो निपुणो गुणलक्षणो व ननु यो
गरूढिस्वीकारः। न च तत्र शक्तिरेव श्रयं च भवत्वादित्याकूतं इदमुपलक्षणं अनादिलक्षणा सर्वापि रूढिलक्षणैवेति द्रष्टव्यं।
प्रसिद्धेरिति प्रयोगवाहुल्यादित्यर्थः। सांतराय निरूढेति मुख्यार्थव्यवहितवीरादिनिरूढ इत्यर्थः। रूढिलक्षणाया एकत्वात्
३ ।येहाय प्रयोजनलक्षणां विभजते स्वसिद्धय इति। तथा स्वस्य सिद्धये पराक्षेपउपादानं परार्थं स्वसमर्पणं लक्षणमित्यर्थः। अस्मि
न्नेव कुंताः प्रविशंतीत्यत्र कुंतकुंतिनोः कुंतत्वेन गंगायामित्यत्र तीरस्य स्रोतस्त्वेनैव लक्षणयोपस्थितिः। इयानस्ति भेदः प्रथमे
कुंतस्याचेतनतया चेतनाधिष्ठितस्यैव प्रवेशाच्चयात्। कुंतिन्याक्षिप्ते कुंत। कुंतिनोस्तत्त्वमिव प्रवेशान्वयोऽतोऽजहत्स्वार्थेय
मुच्यते। स्वार्थमादायैवान्वयात्। गंगायामित्यत्र गंगात्वेनोपस्थितस्य तीर एव वासान्वयो न स्रोतस्यपीत्यत एवेयं जहत्स्वार्थे
त्युच्यते। एवं च काककुक्कुरादिसंबंधिरक्षणे छत्रितदितरकर्तृकगमने तात्पर्यविषयीभूते काकमात्रस्य छत्रिमात्रस्य च नान्वय
इति तादर्थ्यं काकपदेन छत्रिपदेन च स्वसंबंधी कुक्कुरादिः स्वादितरश्चाक्षिप्यत इति तत्राप्युपादानलक्षणैवेत्याशयः यद्वाच्यापि पि
त्यागेन परार्थोपादानमुपादानं स्वार्थपरित्यागेन तदुपादानं लक्षणमित्यर्थः। अत्र मते कुंताः प्रविशंतीत्यत्र कुंतत्वसंयोगाश्रय
त्वेनोभयसाधारणरूपेण तदुभयोपस्थितिः। गंगायामित्यत्र यद्वक्ष्ये गत्वा गंगातीरं तस्य तीरत्वेनोपस्थितिः। एतद्धि कुंता
इत्यत्रोभयसाधारणरूपेण गंगायामित्यत्र स्रोतस्त्वेन रूपेण लक्ष्योपस्थितिरिति। शिखरिणां प्रच्छत्ररत्नानां संभवतां यथा स्वा
दूये विकुंताः इत्यत्र यथा कुंत्यप्रतीतिर्गंगायामित्यत्र पावनत्वादिप्रतीतिस्तथानुपदं वक्ष्यामः। इदं त्ववधातव्यं। यदर्थान्तरसंक्रमि
तवाच्ये ध्वनौ सर्वत्रोपादानलक्षणा मूलमत्यन्ततिरस्कृतवाच्ये तु लक्षणलक्षणेति। एवं च काकेभ्य इत्यादौ प्रथमव्याख्याने का
कत्वेन काकादीनामुपस्थितिः छत्रिण इत्यादौ छत्रित्वेन छत्रितदितरोपस्थितिः। यद्यपि काकत्वछत्रित्वयोर्नोभयसाधार
एवं यद्यपि जहत्स्वार्थायां लक्ष्यमेव संबंध इति पददर्शनं तथाप्यमीणां मते प्रयोजनप्रत्ययानुरोधेनोभयसाधारणधर्मरू
पसंबंधेन लक्ष्यतावच्छेदकरूपेणोपस्थितिरिति ध्येयं। द्वितीयव्याख्याने तु दध्युपघातकत्वेनैकसाधर्म्येण योपस्थिति
रिति। भृकुटिश्चलाजोत्पविलक्षणाचिरोव इति सूचितं। अन्ये तु मते दृष्टार्थ उभयपन्यस्य पतिगोरनुबंध इति। आक्षिप्यते
लक्ष्यत इत्यर्थः।। विशेष्यमिति। नागृहीतविशेषणान्यायापाकरणाभावे वस्त्रादि छिद्रितावः। तदेतद्धृदयं निधायोक्तं न इष्य
त्रेति। अनादित्वादिति तात्पर्यानवधारणाद्रूढिरियमिति। इयमुपादानलक्षणा न रूढिर्न रूढिलक्षणेत्यर्थः। तथा च प्रकृते लक्ष
णाया नवंती रूढिलक्षणतो वस्त्वात्। न च प्रयोजनभूत्वा वास्तस्याः प्रयोजनवत्त्वाभावात्तस्याः समर्थ इत्यर्थः। संप्रदायवि
दस्तु। यत्र निर्वचनानुपपत्तिरेव बाधस्तत्र रूढिलक्षणा न च गोशब्दस्य प्रयोगोऽत्र लिंगत्वमीति गोरिति निर्वचनस्यत्व

३

क्वापि सत्वादित्याहुः कथं तर्हि व्यक्तिलाभ इत्यत आह। व्यक्त्यविनाभावित्वादिति। आक्षिप्यते। अनुमीयते। तथा चान्यलभ्यत्वान्न रूढिलक्षणापीति भावः। न
चानुमेयत्वे शाब्दबोधवहिर्भावापत्तिः। अर्थापत्त्या द्वारेण यमाश्रित्याभिधानात्। ननु भोजनाऽभावसहितं पीनत्वमनुपपद्यमानं रात्रिभोजनं लक्षयति। रात्रि
भोजनपीनत्वयोः सामानाधिकरण्यं संबंधः भोजनरहितोऽयं पीन इति कुरूपवैशिष्ट्यप्रतीतिः प्रयोजनमिति लक्षणासामग्रीसत्वात् तत्रापि लक्षणेत्याशंक्य
निषेधयति। पीनो देवदत्त इति। श्रुतार्थापत्तेरिति। तथा चान्यलभ्यत्वान्न लक्षणाप्रसंग इति भावः। यत्र शब्द एवानुपपद्यमानो योग्यतावच्छेदकतया शब्दान्तरमा
क्षिप्य योग्यं कल्पयति सा श्रुतार्थापत्तिरन्यत्रार्थापत्तिमात्रमित्यर्थः। क्वचित्तु रात्रिभोजनं न लक्ष्यत इति पाठस्तत्र कश्चिद्दाहेति शेषः। उत्तरत्रापि तस्या विषयत्वा
दिति पाठस्तत्रापि तस्याः कल्पनाविषयत्वादित्यर्थः। संप्रति लक्षणलक्ष्यमुदाहरति। गंगायामिति। शुद्धैवेति व्याचष्टे। उभयेति। अत्र सादृश्यातिरिक्तसंबंध
मात्रनिबंधनत्वं शुद्धात्वं। तेन सारोपसाध्यवसानयोर्भेदः। सारोपासाध्यवसाने ऽभ्रसादृश्यतदतिरिक्तसंबंधनिबंधनत्वेन क्वचिदस्तु द्वैतं च द्रष्टव्यं। वक्ष्य
ति गौणौ शुद्धौ चाविह्यावितिति। अत्र हेतुः। उपचारेणेति। भिन्नत्वेन प्रतीयमानयोरैक्यारोपणं उपचारस्तदमिश्रत्वात्। उपचाराविषयविषयत्वादित्यर्थः। भिन्न
त्वेन प्रतीयमानत्वं चाभिन्नार्थवाचकशब्दप्रतिपाद्यत्वेन प्रतीयमानत्वं। आरोपितक्रियास्मकलक्षणोपस्थाप्यार्थविषयत्वादारोपितत्वोक्तिः। एवं चाविषयत्व न
मारोप्यत्वमुद्देश्यत्वं चारोपविषयत्वमिति ध्येयं। साध्यवसानविषयेऽप्युपचारसंभवेन तदविषयविषयत्वादुपादानलक्षणलक्षणयोरूपचारविषयेऽनवतारात्।
आरोपविषयस्य पृथगुपादानेन तन्निगीर्णत्वाभावात्। अत एव सारोपसाध्यवसानयोः समनियमः। हेतुसिद्धिं परिहरति। अंशयोरिति। भेदरूपं भेदगर्भं ताटस्थ्य
मारोपः। तत्त्वप्रतिपत्तौ स्त्रोतस्त्वप्रतिपत्तावित्यर्थः। तथा च तीरेऽन्नत्वेन प्रतीति नास्तीति सदृष्ये क्वारोपणमप्रयोजकमिति भावः। नन्वनुपपन्नमिदं। नहि
येन रूपेणायस्यान्वयनिश्चयस्तेनैव रूपेणान्वयोऽयोग्यत्वादतः कथं स्त्रोतस्त्वेनोपस्थिते घोषवासान्वयः। किं च स्वार्थादन्येन रूपेण ज्ञानं भवति लक्षणा।
न चात्र तथा। स्त्रोतस्त्वेनैव तत्प्रतीतेः अपि चैवं साध्यवसानायाभेदो न स्यात्। तत्र भ्रमः। नहि समानप्रकारकज्ञानमात्रं विरोध्यपि तु समानविषयत्वविशिष्ट
तं। अन्यथा घटः क्वचिदस्ति क्वचिन्नास्तीति तत्रापि तत्प्रतीतिर्न स्यात्। न चात्र समानविषयत्वमस्ति। स्त्रोतस्त्वेन तीरस्योपस्थितेर्विषयभेदादतो नायोग्यताज्ञानं।
न चासंसर्गग्रहः स्त्रोतस्त्वग्रह एव तीरे कथमिति वाच्यं। आहार्यारोपवदुपपत्तेः। इत्थं च विरोधावसरे ऽत्रेच्छानियामिका। अत्र तु लक्षणास्वाभाव्यमन्यथा लक्षणैव न
स्यात्। प्रकारान्तरेण प्रयोजनालाभात्। सर्वतो बलवती ह्यन्यथानुपपत्तिरिति न्यायात्। स्वार्थादन्येनेत्यादिकमप्रयोजकमेव। अत एव विशिष्टशक्ता
गवादिपदस्य व्यक्तिमात्रपरत्वेऽपि लक्षणैवेति प्राञ्चः। अस्तु वा तीरत्वेनैव ज्ञानेऽन्यत्र संबंधग्रहात् स्त्रोतस्त्वेन भानं। ननु तीरत्वस्यानियतोपस्थितस्या
भानेऽतथात्वे तस्य स्त्रोतस्त्वस्य च भाने किं बीजमिति चेत्। लक्षणास्वाभाव्यमित्येव हि। अन्यथाऽजयाजनाप्रतिपादनेन लक्षणैव न स्यादित्येके तु स्यात्। साध्यवसा
नामा आरोपविषयनिगीर्णनमेव भेदकं। एवं च यत्रारोप्यारोपविषययोः प्रतीतावप्यभेदबुद्धिः सा सारोपा। यत्र जातादृश्यैव विषये आरोप्यमात्रोपादानं सा सा
ध्यवसाना न चेह तदस्ति। गंगातीरमित्यादावभेदबुद्धेरभावेन गंगायां घोष इत्यादौ तन्निगीर्णत्वाभावात्। असतोऽनिगीर्णत्वात्। यत्र च गंगाघोषवतीत्यादौ त

।थाप्रतीतिस्तत्र साध्यवसानैवेति सहृदयैर्विभावनीयं। मुख्येति। तथा च स्वाप्यनेन शक्यप्रयोगे किमिति यथा चक्रं प्रयोक्तव्यम इइतिमा
येन तथैव प्रयोगे लक्षणैव न स्यादिति भावः। यद्वा तत्प्रतिपत्तौ गंगाशब्दप्रतिपाद्यप्रतीतिपत्ता विपर्ययो वा द्रव्यः। गंगासंबंधमा
त्रप्रतीतावित्यत्र यथा कथंचिदिति शेषः। एवं च पंचमव्याख्याने लक्षणास्थाने व्याप्तीरस्य दूरत्वेनोपस्थितिस्तदुपस्थितिमाय
वाचनत्वप्रतीतिस्तथात्रापि वक्त्राभाव्याद्यैव तत्पदप्रतिपाद्यत्वज्ञानाद्ध्ययोजनप्रतीतिरास्थिरा विशेषाभावात्। अत एव लोकहातिकूपदमुख्य
नुभावकं। अत एव गुणाध्यलक्ष्यसाधारणरूपेणोपादानलक्षणायां लक्षणलक्षणायां च तीरत्वेन तीरोपस्थितिरिति मतेऽपि न प्रयोजनोपस्थि
तिप्रतिबंध इति रहस्यं। प्रयोजनलक्षणायां भेदान्तरमाह सारोपेति। शुद्धपादानलक्षणालक्षणाभ्यां व्यवच्छिनत्ति। अनयोरुक्तभेदाद्येति तथा
शाब्दार्थमाह सामानाधिकरण्येनेति। एवं च भिन्नप्रवृत्तिनिमित्तानां कस्मिन्नर्थे वृत्तिरिति शाब्दसामानाधिकरण्यमपि निरुक्तं भवतीति भेदाव
रमाह विषयन्तेति। कृत इति। आरोप्यमाणस्याकृत्वाद्विषयवाचकमात्रप्रयोगोऽध्यवसानं। अत एवारोपविषयवाचकमात्रपदोपादानेन साध्यवसा
नत्वं। आरोपविषयस्यानुक्तत्वात्। प्रयोजनप्रतिपादकत्वमोक्षत्वे। तदप्रतिपादकत्वे चानौचित्यमिति। निगीर्णेति। आत्मपरिशेषीकृत इत्य
र्थः। एवं च यत्रैव सारोपा तत्रैव साध्यवसाना। अत एव नोपादानलक्षणालक्षणयोः साध्यवसानाव्यभिचारं प्राहुः। नन्वेवं भेदद्वयं गौणतामुपचारे
विगतमत आह भेदाविमाविति। तथा च यत्र सादृश्यसंबंधस्तत्र गौणीव्यवहारो यत्र सादृश्यादन्यः संबंधस्तत्रोपचारव्यवहारो वस्तुतो भावे
योरपि लक्षणात्वमेवेत्यर्थः। गौणो शुद्धो वेति। एवं च गौणसारोपा गौणसाध्यवसाना शुद्धसारोपा शुद्धसाध्यवसाना चेत्यर्थः। उदाहरति गो
र्वाहीक इति। अत्रेति। गोशब्दो लक्षणया गोत्वसहचारितजाड्यादिकमुपस्थापयति तत्तु तद्धर्मिनमित्तीकृत्य वाहीकमभिधत्त इत्यर्थः। अन्य
तु निमित्तस्य वाच्यवृत्तित्वादस्य च तदभावाद्वाहीकेऽपि गोशब्दः शक्त्या किमुत्वेन गौरित्याहुरिति मतान्तरमाह स्वार्थसहचारीति। ननु परार्थो विधीय
तइति। तथा च गुणमात्रेण लक्ष्यते परार्थस्तु शक्यत एवेत्यर्थः। परार्थस्य गोपदाप्रतिपाद्यत्वे शाब्दसामानाधिकरण्यानुपपत्तिरिति सिद्धांत
पक्षमाह साधारणेति। स्वार्थसहचारिजातीयजाड्यादियुक्ततया वाहीक एव लक्ष्यत इत्यर्थः। उपस्थितिश्च गोत्वादिना जाड्यादिमत्त्वेनैव व
तिबोद्धव्यं। अत्र वृद्धसंमतिमाह अभिधेयेति। अभिधेयं बोध्यमात्रस्फूर्तिलक्षणानुरोधाद्वा प्रतीतिरिति संमुख एवार्थः प्राचीनमते। प्रती
यतेनैनैतु प्रतीतिव्यापार इति नव्यमते। च स्फुटेन नव्यमतं साधीय इदुक्तं क्रमेण। एवं च गौणत्वेऽपि लक्षणाया विशेषविवक्षया तथात्व इति। म
।चपुरुषयोर्नान्तरीयकत्वाभावादिति भावः। ननु कोऽसौ काले तयोरव्यभिचारिभावोऽस्ति। एवं च प्रवेशनकाले कुन्तकुन्तिनोः कुक्कुरादीनां दध्यु
।पघातकत्वज्ञानं नदस्राया तदस्ये यान्यथा लक्षणैव न स्यात्। न हि दध्युपघातकत्वेनातर्कितादृक्षतोपदेशो युज्यत इत्युपस्करसादाहस्त्र
।।विना भावे वेति। लक्षणायामकिंचित्करत्वात् सिद्धिं निराकुर्वन्निति शेषः।। ध्वनिसंबंधमात्रस्यातिप्रसक्त्या दविनाभावोऽपेक्षः। स यत्तथा

पिसमान एव तात्पर्यान्नियमस्तत्त्वाय एव वस्तुतः। शब्दस्य स्वपरत्वे लक्षणावश्यकी न च शब्दस्यार्थे नसंभवेदिति कः कालिकोवाऽविनाभावइति। शुद्धसारो
पाध्यवसानेविवेचयति। आयुर्घृतमिति। संबंधांतरतत्तथेति व्याचष्टे। सादृश्यादन्यदिति। एवमादाविति। अत्र लक्षणपदं करणव्युत्पत्त्या शक्यसंबंधपरं
पूर्वसंबंधांतरव्याख्यानपरत्वमत्र तु प्रकृतार्थातिदेशपरत्वमित्यपौनरुक्त्यं। अत्र रूपकालंकारे गौणसारोपायां अतिशयोक्तिविशेषे गौणसाध्यवसा
नायां उपयोगः। शुद्धसाध्यवसानसारोपयोः कार्यकारणभावसंबंधनिबंधनयोः परमते हेत्वलंकार एतन्मते तु स्वातंत्र्येणैवोपयोगो न त्वलंकारत्वेन
तथैवदन्यमेवोत्तिकृता वक्ष्यमाणत्वात्। एवमन्यसंबंधनिबंधनापि बोद्धव्यं। आसां विवेचनप्रयोजनमप्येतदेवेति स्मर्तव्यं। सारोपसाध्यवसानयोः
प्रयोजनलक्षणात्मके: कर्तु मुभयोः प्रयोजनमाह। अन्यातेति। गोवाहीकयोरिति जाड्यमांद्यादिधर्मयोरभेदेनातादूप्यप्रतीतिरभेदप्रतीतिः प्रयोजन
मित्यर्थः। ननु गोवाहीकयोरभेदप्रतीतिर्वाहिके गोगतजाड्यादिप्रतीतिर्वा प्रयोजनमिति नियमः कर्तव्यः। तस्य वा काऽर्थो महिमलभ्यत्वादिति भावः।
एवमादाविषयेनेत्यातिदिशंप्रपंचयति। कचिदिति। तादर्थ्यात् संबंधादिति शेषः। एवं स्वस्वामिभावादावप्ययं शेषः यथाक्रममिष्टार्थेदाधित्वं ऽलंघनी
यातृत्वं कौशलातिशयः सामर्थ्यातिशयश्च प्रयोजनं। उपसंहरति। लक्षणा तेनेति। आरोपाध्यवसानयोर्भेदत्तु दृष्टात्षड्भेदमुपपादयति। आद्येति। लक्षणा
प्रयोजनलक्षणेत्यर्थः। तेन रूढिलक्षणा तद्भेदेन स्वरूपत्वमादाय विरोधो नाशंकनीयः संप्रति कोव्याप्यव्यापकयोगतया लक्षणासामान्यमन्यथाविभज
ते। व्यंग्येनेति। ननु प्रयोजनसाहित्येपि व्यंग्यसाहित्यं कुतस्त्वमित्यत आह। प्रयोजनं हीति। एतद्विभागप्रयोजनं च रूढिप्रयोजनलक्षणाभ्यामन्याल
क्षणेवर्त्तिनेधेयानेयार्थत्वापातादित्यवधेयं। तन्नेति। एवं च षड्विधा याः प्रत्येकं गूढागूढव्यंग्यत्वमुपपादयता द्वादशविधत्वं रूढिलक्षणायास्सहद्वा
दशविधत्वमित्यवधेयं। गूढत्वं सहृदयमात्रवेद्यत्वं न तु वाच्यव्यंग्ययोर्द्वयोः प्रतीतिमानभेदत्वं तस्याऽस्फुटत्वलक्षणगुणीभूतव्यंग्यतयालक्ष
णामूलप्रधानध्वनिविलोपापत्तेः। अगूढत्वं सहृदयासहृदयवेद्यत्वं। मुखमित्यादि। विकासोनाम पुष्पधर्मः तेनानिशयितत्वं लक्ष्यते। असंकुचितत्वं सं
बंधः सौरभातिशयो व्यंग्यः। वशीकरणं चेतनधर्मः। तेन स्वाधीनत्वं लक्ष्यते। अभिमतविषये प्रवृत्तिः संबंधः स्वाधीनं ह्यभिमते प्रवर्त्तते। पुरामुग्धत
या याहक्षिकी लोचनप्रवृत्तिरासीदधुनाभिमतविषयप्रवृत्त्याऽनुरागित्वं व्यज्यते। समुल्लसनं स्त्रोतोधर्मः तेन बाहुल्यं लक्ष्यते कार्यकारणभा
वः संबंधः। बकुलं हि वक्रसमुल्लसति। गतः सकलकामुकमृगवागुरात्वं व्यज्यते। संस्कामर्यादातत्पासनं चेतनधर्मः तेनाधीरत्वं लक्ष्यते। कार्यकारणभा
वः संबंधः। अनुरागातिशयो व्यज्यते। मुकुलितत्वं कुसुमधर्मः। तेन काठिण्यं लक्ष्यते। निबिडावयवत्वं संबंधः। आलिंगनयोग्यता व्यज्यते। उद्धुरत्वं चेतन
धर्मः। तेनसातिशयत्वं लक्ष्यते। कार्यकारणभावः संबंधः। रमणीयत्वं व्यज्यते। मोदनं चेतनधर्मः तेनानियंत्रितत्वं लक्ष्यते कार्यकारणभावः संबंधः स्पृहणी

म३)

यत्त्वं व्यज्यते। अत्रेति। शब्देन अज्ञातज्ञापनमुपदेशः स च प्रकृते बाधित इत्यज्ञातज्ञापनसामान्यं लक्ष्यत इत्यर्थः॥ अनायासेनेति। शिक्षया आदानम
नायासेनैव निर्दुष्टमिति निर्व्यापमतिस्फुटमित्यर्थः॥ इयं च प्रबंधनायकप्रभानंतरं नायिकामभ्यापयतो नायकोपाध्यायस्योक्तिः। अत्र चास्तदृव्यंग्ये
गुणीभूतव्यंग्यत्वं ध्रुवं गूढव्यंग्यत्वं तमत्वमिति विवेकः। त्रयोदशविधामपि विवक्षां विशेषेण संकलयति तद्दैवेति। लक्षणां निरूप्य तद्द्वारकं
5 लाक्षणिकशब्दस्वरूपमाह तद्भूरिति। लक्षणाजनकत्वं शक्यार्थबाधितमित्यन्यथा व्याचष्टे तदाश्रय इति। एतावन्मात्रं यद्यपि वाचकत्वादिदूरा
साम्यमस्ति तथापि लक्षणायाः प्रतिपादकत्वेनैतत्त्वमित्यत्रतात्पर्यम्। संप्रति व्यंजकशब्दं लक्षयितुं व्यंजनां विवेचयति तत्रेति प्रयोजन इत्यर्थः। यस्येति।
नहि गंगातीरे घोष इति च तत्प्रतिपादकोऽनजानातीति न वा तत्प्रयोगप्रकृतार्थप्रतीतिरेव न तत्त्वविति येनैवं लक्षणां कुर्यादिति प्रयोजनप्रत्ययादिति भा-
वः॥ न च स्वत्वनुमानादेव तत्प्रतीतिरित्याह शब्दैकगम्य इति। व्याप्त्यप्रतिसंधानेऽपि जायमानत्वादिति भावः॥ क्रियापदं व्याचष्टे व्यापार इति। ननु
प्रयोजनस्य शाब्दत्वेऽपि विषयया लक्षणया वा नोक्तो व्यंजनया स्वत आह नास्ति चेति। उपलक्षणमिदं पदार्थसंसर्गभिन्नतयाग्रेऽप्यूह्यम्।
अनन्वतात्पर्यमिति द्रष्टव्यं। तेन तत्र चाभिधाता तात्पर्यलक्षणाख्यो व्यापारांतरेणागम्या इत्यादायनोपक्रमोपसंहारयोर्विरोध इति समर्थयितुं। समयाभा-
वादिति। साक्षात्साक्षात्साभिप्रायः संकेतः प्रयोजने गंगादिशब्दानां नास्ति न च कल्पयितुमपि शक्यते अन्यलभ्यत्वात् असंकेतितार्थस्यवाभिधया
प्रतिपादनादिति भावः। तथा चेति। तथाहीत्यर्थः। अन्यथा नामनेकार्थत्वात्। क्वचित्तथाहीत्येव पाठः। लक्षणाया हि प्रयोजनप्रतीतिर्लक्ष्यप्रतीत्यनं-
तरं तत्समकालं वा आधेयं तच्च न मुख्यमिति। ननु मास्तु तत्र मुख्यो बोधस्तथापि लक्षणानुरोधेन ज्ञाप्यमात्रबाध एव लक्षणाबीजं स्यादित आह नापि।
चेति। ननु मास्तु बाधः तात्पर्यानुपपत्त्या तद्विषयीभूता च यानुपपत्त्या वा लक्षणा स्यादत आह योग इति। ननु तीरादेः प्रयोजनस्य साक्षात्संब-
धाभावेऽपि प्रयोजनाश्रयसंबंधित्वं परंपरासंबंधोऽस्त्येवेति मूलयुक्तिमाह न प्रयोजनमिति। तदेतद्विवृणोति कारिकाभ्यां व्याचष्टे यथा गंगाशब्द इति। तथा
। च गंगाशब्देन लक्षणाया यथा तटं प्रतिपाद्यते न तथा प्रयोजनं विरम्य व्यापाराभावादिति भावः। किंतु प्रयोजनं प्रतिपादयितुमसमर्थ इति
। पाठस्तत्र यथा लक्षणया तटं प्रतिपादयितुं गंगाशब्दो नासमर्थस्तथा प्रयोजनमपि तथा च लक्ष्यप्रयोजनयोर्नैकक्रमिकप्रतीतिः स्यादित्यर्थः॥
। ननु प्रयोजनेऽपि लक्ष्ये प्रयोजनांतरं स्यादतो न सामर्थ्यमनवस्थेत्यत आह एवमपीति। प्रकृताप्रतीतिकृदिति मूलं तत्र कारिकोक्तस्य विवरणं
। द्वितीयपक्षमाशंक्य व्याचष्टे यथा गंगाशब्द इति। सिद्धमर्थमुपसंहरति नापि गंगाशब्द इति। प्रयोजने नेति। शब्दव्यापारविशेषलक्षणाजन्य
ज्ञानस्य ज्ञानरूपाया लक्षणाया वा प्रयोजनमिह निरूप्यते तत्र प्रथमे व्यापारो विषयनिष्ठो न तु प्रयोजननिष्ठः। तथा त्वे च तस्य लक्षणाजन्यज्ञा-
नविषयत्वे तदतिरिक्तफलोपगमेऽनवस्थापर्यवसानं। तस्मात्फलत्वविषयत्वयोर्विरोधान्न फलमपि विषयः। विषयत्वे वा न तत्फल-
त्वं किंतु तद्भिन्नं। न चात्र प्रयोजनांतरमस्ति तदभ्युपगमे यानवस्था फलक्रमे च। अन्यथा पावने तीरे घोष इति चेत् सतीत्यपि यानादिविशेषप्रा-
प्तौ लक्षणैव न स्यात्। न च व्यंजनया तदुपस्थिता वृथैवानुयोगः। शैत्यपावनातिशयप्रतीतेर्व्यंजनाद्यसाध्यत्वात्। लक्षणाया ज्ञानरूप

तीर

त्वेस्फुर एव फलविषययोर्भेदः। यद्यपि फलत्वं जन्यत्वं यदि तदा प्रकृतासंगतिः। पावनत्वादेरेतदजन्यत्वात्। ज्ञाप्यत्वं च प्रकटतादावसंभवि
तयोः प्रत्यक्षाजन्यत्वात्। तथापि जन्यत्वमेव फलत्वं शैत्यपावनत्वादिप्रतीतेरेव प्रकृते फलत्वात् तस्याश्च तज्जन्यत्वात्। न चैवं पावनत्वादौ
फलत्वाभिधानविरोधः। प्रयोजनज्ञानविषयतया तस्यापि प्रयोजनत्वात्। शाब्दज्ञानविषयतया घटादेः शाब्दत्ववत्। कथं तर्हि पावनत्वादि
प्रतीतिरत आह। विशेषा इति। तटादाविति। लक्षितद्रव्यस्य व्याख्यानं स्फुरतीति। प्रतीतिविषया इति शेषः। इदमिदानीं विचारमर्हतीति। तद्धि जन
यापि प्रयोजनप्रतीतिर्लक्ष्यप्रतीतिसमकालमुत्तरकालं वा। आद्ये पदार्थज्ञानं विना शब्दमात्रस्याव्यञ्जकत्वात् सहकारिविरहात्। अन्त्ये
शब्दबुद्धिकर्मणां विरम्य व्यापाराभावादिति। उच्यते। लक्ष्योपस्थित्यनन्तरं व्यञ्जनया वाक्यैकवाक्यतावत् प्रयोजनमादायान्वयबोधसंभ
वे न विरामाभावात्। व्यंग्यरूपाभिधेयापर्यवसानादाकांक्षासत्त्वादिति। एवमिति। यद्यपि प्राथम्यादभिधामूलं प्रथमं वक्तुमर्हतीति। तथा
पि तात्पर्यसहकारेणाभिधयैव व्यंग्यार्थप्रतीतौ व्यञ्जनायां प्रमाणाभाव इति दुर्दुरूढविप्रतिपत्तिमपनेतुं लक्षणेव व्यञ्जनायां प्रमाणमि
त्याविःकर्तुं व्युत्क्रमाय लक्षणायां वाच्येनाभिधाविच्छेदात् प्रकारान्तरालक्ष्य प्रयोजनं विना तदसंभवाच्च। अभिधानियमनस्थले त्वर्थान्त
रप्रतीतिरेव न भवतीत्यपि स्यात्। अत एव ध्वनावपि प्रथममविवक्षितवाच्यमेवोदाहरिष्यति। अभिधामूलमभिधातुं भूमिमारचयति।
अनेकार्थस्येति। अत्र संयोगाद्यैर्वाचकत्वे नियन्त्रित इत्यर्थः। अवाच्येति। अवाच्यमिवाच्ये वा मगृहीततात्पर्यमिति यावत्। संयोगादीन्
गणयति। संयोग इति। उक्तं हि शाब्दिकमार्गेण वाक्यपदीयके त्वभर्तृहरिमार्गेणेति यावत्। एतेनास्य सूत्रत्वभ्रमं निराकरोतीति भास्करः। विप्र
योगः संयोगाभावो विभागो वा। विरोधो वाच्यघातकलक्षणः। सहानवस्थानं वा। अर्थः प्रयोजनं प्रकरणं बुद्धिविशेषः। लिंगं चिह्नं शब्दस्य
नियतार्थस्य उचितीयुक्तता। व्यक्तिः स्त्रीपुंनपुंसकादिः। स्वर उदात्तादिः। शब्दार्थस्येति। अत्र स्मृतिपदेन तत्कार्यं वाक्यार्थानुभवमभिप्रेति ते
न पदार्थस्य स्मरणं भवत्येव। वाक्यार्थानुभवस्त्वभिधया तात्पर्यनियमान्न भवतीति भावः। क्वचित्तु शब्दस्यार्थव्यवच्छेद इति पाठः तत्रापि सं
योगादयो नानार्थ एकार्थान्वयबोधप्रतिबन्धपूर्वकं तदितरविशेषान्वयबोधहेतव इत्यर्थः। संयोगविभागावुदाहरति। सशंखचक्र इत्या
दि। अत्र शंखचक्रसंयोगेन हरिशब्दो विष्णौ। शंखचक्रसंयोगाभावेन च तदन्यस्मिन्नियम्यत इत्यर्थः। यद्यपीन्द्रादेरपि हरिशब्दवाच्यस्य
शंखचक्रसंयोगो न विरुद्धस्तथापि विष्णोस्तस्योत्कटत्वादेतदध्यवसेयं। क्वचित् इत्यच्युत इत्युत्तरत्र इत्यच्युत इति च पाठः। पुत्कम्भायं रामलक्ष्म
णाविति दाशरथ्यावित्यादिसंदेहात्। अत्र पक्षेऽपि प्रयोगो विभागः। एवं चाशंखचक्र इत्यस्य शंखचक्रविभक्त इत्यर्थः। विभागस्य संयोगसमा

५६)

आधिकरणतया तत्संयोगस्यैव तद्विनाशस्यापि विप्रयुक्तत्वात्। अतएव विप्रयोगशब्दस्यानौचित्या वृथावाचकत्वेपि अव्यक्त एव हरिशब्दः। सि
धानियमनं। प्रसिद्धिपूर्विकत्वाज्ज्ञप्तिनिषेधस्य। न ह्यन्यस्य संख्यादिप्रतीतिरस्तीति भास्करः। रामार्जुनेति। अत्र च व्याघातको विरोधः। सह
नवस्थाने तु शोभायानपायुहार्यो। स्थाणुमिति। अथ शेषः स्वप्रयोजनस्य वृद्धिस्वांशसाध्यत्वात्। स्थाणुः रुद्रः। सर्वज्ञो नामीति। देवस्य रूप्य
प्रकरणेन संयोगेन नियमनात्। संयोगस्यैव युक्तत्वं त्योदित्यर्थः। कुपित इति। अत्र कोपरूपचिह्नेन मकरध्वजशब्दो मन्मथे नियम्यत
6 इत्यर्थः। वस्तुतो मकरध्वजशब्दस्य कामे प्रसिद्धेश्च नियमनं न तु कोपरूपचिह्नेन। अत एव मकरध्वज नियमितेऽत्र लिङ्गवाच्यत्वं च स्व
तो मकरध्वजस्यैव कोपस्य सकलप्राणिसाधारणत्वेन तच्चिह्नकृत्याद्य। तस्मात् कुपितत्वेन याव कुपितप्राप्तो मकरध्वजेन चिह्नेन कुपित
शब्दः कामदेवे नियम्यत इत्यर्थः। न च कुपितशब्दो नानार्थ इति वाच्यं। अनेकस्य उपस्थापनसमर्थस्यैवात्रानेकत्वेन विमतत्वात्। अ
तएव देवस्य पुरारातेरित्यत्रानेकस्योपस्थापकतयैवानेकार्थत्वं च दूष्यति। अञ्जनयाऽपानवायुग्रन्थीत्याऽश्लीलत्वं च दूष्यति। मधुना
मत इति। न वाच्यो भेदः। तत्र प्रयोजनेनाभिधानियमनमत्र तु कार्येणेति महान् भेदः। अनिष्टस्यापि कार्यत्वात्। यत्रेह तु व्यङ्ग्यमार्थं तत्रार्थाधि
त्र तत्रोक्तं तत्र शाब्दसामर्थ्यमिति याभेदः। पाच्चिति। सांमुख्ये मुख्यशब्दोक्तिपर्यन्तमित्यर्थः। अत्रापि मुखकामिनीमुखगतानं कामिनए
व भजतीत्यौचिती। सैव नियामिकेति द्रष्टव्यं। मित्रं त्वातीति। एतद्ध्यजातीति पदसमभिव्याहारात् मित्रमित्यत्र न सूर्यः सुहृदा। निर्णये सति चे
द्व्यं। अन्यथा द्वितीयैकवचने पुंल्लिङ्गेपि संभवेन लिङ्गसंदेहात्। मित्राणीत्यत्र तु सुहृत एव लिङ्गनिर्णय इति द्रष्टव्यं। इन्द्रशत्रुरिति। अ
त्र षष्ठीतत्पुरुषसमासो तस्य चोत्पन्नेनान्तोदात्तः स्वरस्तेनेन्द्रस्य शमयिता शातयिता वा लभ्यते। यदा तु बहुव्रीहिस्तदा बहुव्रीहौ प्रकृत्या पूर्व
वेपदमित्यनेनाद्युदात्तः स्वरस्तेनेन्द्र एव तथा लभ्यत इत्यर्थः। यद्यपि काकुरूपस्वरे ताकाव्येप्यर्थविशेषप्रतिपत्तिर्न स्यात्तथापि स्वरशब्दो नाद्यो
दात्तादिर्विवक्षित इति भास्करः। वस्तुतस्तु काकुस्तद्वैशिष्ट्ये ज्ञानादृथा वाच्यं जनक एव न तु काकोरस्तिधानियामिकेति तत्त्वं। अत्र च दोषाः
दुष्टे प्रसिद्धाधुनेत्यादौ द्वे इत्यत्र प्लुतकरणेन मयीति व्यवच्छेदेन द्विपरत्वग्रहसंभवात्। प्लुतस्योदात्तरूपत्वात्। कथं काव्येपि स्वरो न वि
शेषप्रतीतिस्थलं। किंच तत्तद्रसे तत्तत्स्वरनियमनं स्वरतादौ न स्यादिति। अत्र सौभ्रात्रिकाः॥ वेद इवेत्यनेन यथा वेदे स्वरवाक्यत्वं न तथा
काव्ये किंतु धात्विकत्यमिति रिष्टत्यर्थं व्यावर्तते। वस्तुतस्तु नाभिधानियामकमात्रं वेदोपयोगीव काव्योपयोगीति न स्वरोपि गण्यते। अपि
तु यन्नियमितायामभिधायां पुनस्तदर्थस्य सहकारिविशेषेण व्यञ्जनया प्रतीतिस्तदवकाशोपयोगि। अनेकार्थस्य शब्दस्याप्यादित्र स्वरस्या
त्। न च प्लुतेन संबुद्धिर्ध्वनिपर्यायात्तद्दृष्टपरत्वनिर्णयेपि कदाचित्तत्र व्यवच्छिन्नस्य मयीत्यादेः प्रतीतिः संभवति। द्विरुक्तेः शब्दयोः संकुचि
त्यसाम्येपि प्लुतेनाभिधायानियमनात्। उत्तरस्य साधारण्यात्। किंतु तत्र प्रकरणादिनैवाभिधानियमनं नियमितार्थस्य च व्यञ्जनयाप्र
तीतिरिति। पुनः श्रीरसतो देवस्वरविशेषकथनं मालवादियोगद्वारा तेनात तद्रसाभिव्यञ्जकत्वेन त्वर्थप्यय छेदद्वारेति युक्तमुत्पश्यामः॥

अस्तिनयादृश इति। आदिपदात् प्राग्वाक्यपरिग्रहः। एवं हि तेन। एतावन्मात्रस्तनी एतावन्मात्रास्या मक्षिपत्रास्यौ। एतावन्मात्रा यस्याः
एतावन्मात्रे दृश्यसे।। अक्षिपत्रास्यामित्यत्र तु तृतीया। अत्र एतावन्मात्रशब्दानां तु महदादिवाचकत्वेन नानार्थानामस्तिनय
धिशेषेण तत्तदर्थे नियमनमित्यर्थः। अत्र तत्तदनुकूलाभिनयसहितानि यामकमिति यथास्फुरणमुपयोगः। तद्धक इति। अत्राविय
थाश्रुतवाचकशब्दप्रदर्शयति व्याप्तिरिति व्यंजनया प्रतिपादकत्वं विवक्षितं व्यंजनाय च मतेः कृत्यनुकूलो व्यापार इति बोद्धव्यम्। य
त्सो यौ तरेति। य घस्मात्सनानार्थशब्दोऽर्थान्तरं प्रतिपादयन्नेवेत्यर्थः। एतच्च प्रकृताभिप्रायं निरर्थकवर्णस्यापि व्यंजकत्वादिति।
सहकारित्वयेति वदताऽत्र शब्दस्य प्राधान्यमर्थस्याप्राधान्यमिति गम्यते। प्राधान्यं च व्यंजनायास्तद्वशाच्चयव्यतिरेकानुविधायि
त्वादिति ज्ञेय।। ।।इति मधुमत्यां द्वितीय उल्लासः।। ।।शब्दव्यंजकत्वमभिधाय संप्रत्यर्थव्यंजकतामभिधातुमनुपदति। अर्था इति।
तेषामित्यनेनार्थपरामर्शे अर्थानामर्था इत्यसंगतिरित्यत आह तेषामिति। यद्यप्यर्थव्यंजकत्वस्य सर्वेषां प्राय शब्दार्थानामित्य
नेन प्रागेव दर्शितत्वाद्गतार्थमिदं तथाप्यसौ स्फुटिकल्यशंकापनयनार्थं तत्र तदुक्तमत्र मुख्यतयेति सहकारिविशेषकथन
परोयमारंभः। तथा हि। न च वाच्यस्य व्यंजकत्वे सर्वेषां न तद्व्यंग्यार्थस्य प्रतीतिरप्रतीतिर्वा स्यान्न तु कस्यचिदेवेत्याशयेन घटछौत्विति
करं वक्त्रेति। बोद्धव्यो यदि वाच्यस्य दाषो नूरुक्रममित्यस्य व्यायत्वे प्रतिपाद्य इति। तथा च बोद्धव्यमित्याभावितत्वपर्व्यादिति
सावः। प्रातिज्ञानवनवानमेप शालिनीप्रश्नेव। एवं वक्त्रादिवैशिष्ट्यान्तं सहृदयप्रतिभास्थापकतयाऽर्थानां व्यंजकत्वे सहका
रीति द्रष्टव्यं। अर्थानामिति कर्मनिर्दानीमर्थस्य कस्य तदित्यत आह वाच्येति। एवं वक्त्रवचनमविवक्षितं जीत्यक्तित्रायकं वाच्य
द्वितमिति। अतिविपुलं जलकुंभं गृहीत्वा समागतास्मि सखि त्वरितं। श्रमस्वेदसलिलनिःश्वासनिःसहा विश्राम्या
मि क्षणं। कथि गुपिकूलामिति पाठस्तत्र पृथुलामित्यर्थः। अत्र जलहरणत्वेन दुर्वहत्वं। गृहीत्वेत्यनेन मयैवोत्थापितं न हीनौन्
त्वन्यथासाहाय्यमाचरितमित्यायासाधिक्यं व्यज्यते। अत्र प्रसिद्धस्वैरिणीत्वायाः कस्याश्चिद्दुःशीलतायाः प्रतिपादितत्वे
शिष्टज्ञानादयमर्थः प्रकाशते न तु स्वैरिणीत्वानवगमेपीत्यर्थः। गृहीतमिति। ओष्ठविंदोरपि स्पष्टचिता अन्यसत्वे सनिःश्वासित्व
मम मंदभागिन्याः कृते सखि त्वामप्यहह परित्यजति। अत्र तु हेति कर्मणि निपात इत्येके। कर्मणि षष्ठीत्यन्ये। इहापि प्रसिद्धतत्का
मुपीकोपसोगहृतीत्वलक्षणप्रतिपाद्योद्देश्यकत्वप्रतिसंधानाद्व्यंग्यार्थः प्रतीयते। तथा त्वमामिति। अत्र दृष्टेति सर्वत्रान्वीयते।
विघतेनेति स्वदोमन्फः। शंकतेन चेति। अत्र काकाक्षिगतस्य वाच्यनिषेधसहत्वाभावेन व्यंग्यविधानस्याविसिद्धेः काकोवक्ति सि
व्यंगत्वसंग्या काकाक्षिगत्वमेवात्र शंकितं न तु भ्रमिमरतिमित्यादावि वाच्यासिध्यंगत्वमिति भ्रमः कर्तव्यः। एतेनान्यमिमर

7

ति मित्यादौ व्यंग्यपरत्वार्थस्य वाच्यरूपकसिध्यंगता वक्त्रात्र काकोर्वाच्यसिध्यंगत्वमित्यपास्तं। समाधत्ते प्रश्नेति। प्रश्नमात्रेण नत्रस
मस्ति त्याहृतकाकु विश्रामा मन्थ्राम्येवेति वद्वा यद्यपि सिवेध शिरस्क व्यंग्यप्रतीतेरसत्वान्न तत्वमित्यर्थः। यद्यपि प्रकृते गुणीभूत
व्यंग्यत्वोद्भावनं तन्निरासेन ध्वनित्वव्यवस्थापनं चाप्रकृतं तथैपि काकोर्व्यंजकत्वोन्नपायात् तथापि तथात्वे काकोरेव व्यंजका-
त्वापत्तौ काकुवैशिष्ट्योदाहरणमिदं न स्यात्। ध्वनित्वे तु प्रश्नमात्रविश्रान्तायां काकौ तद्वैशिष्ट्यहीनादुद्यतप्रतीतस्य
सहृदयस्य प्रकृतव्यपधाये प्रकृतार्थव्यंजनात्। प्रकृतोदाहरणतायुक्तप्यतइति। अत्र च काध्या। दिमत्वे तल्लक्षणगुणीभूतव्यंग्य
त्वोन्नावोधि वक्ष्यतो ननु तन्त्रा मान्या नाथः। यद्यपि सन्नास्तीत्यादरतिथास्यमानत्वात्। केचित्तु कुपितोद्धतनायकेन कीर्तिन
श्चितं विपर्ययपर्यवसायित्वं तद्वा काकुप्रकारस्य नार्थे न विनान संशय वीति वाच्यसिध्यंगत्वमिति। तन्न। अलं घनीया ह्यस्य गुरोः
कोपाविषयत्वादेव विपर्ययपर्यवसायित्वासाचात्। अत एवात्र न्यूनपदतां वक्ष्यतीति। अन्यथा कोपाविष्टवक्तृकत्वेन सा दोषा
यन्नस्यात्। तदृश आ इति। तदा मम गंडस्थलनिमग्नां दृष्टिं नानैषीरन्यतः। इदानीं सैवाहं तौ च कपोलौ न सा दृष्टिः। निमित्तां ग्रथि
तो। अनेन प्रेमापचयो व्यज्यते। अत्र तदेदानीरूपपदद्वयात्मकवाक्यवैशिष्ट्यावगमात् प्रकृतार्थलाभ इति द्रष्टव्यं। इदं नीयमि
ती उद्दिश्यत इत्युद्देशः। तेनाद्भुतत्वासुरसकदलीस्तादिभोद्दीपनो व्यक्तः। कुंजस्य कक्षश्च निविडत्वमकरंदरसिकत्वामोदमुदित
मधुकरत्वादि। तेनाकुरितारमणीनाविभ्रमायत्र सततथा। तेनचेदृंकस्य मत्वा सावधुपदर्शयितागतानुकृतिकृतयाप्युनोपद
पीय इति व्यज्यते। नर्मदाया उत्पन्नेन तत्संबंधित्वमतीत्योद्देशस्य महिमा नुसायो व्यज्यते। प्रकृतप्रकाराकांक्षया हितकारी मित्रतया
चिनाहितकारी सुहृत्त्वेन सुहृदित्यनेन त्वद्दर्शनानिःश्वासकदर्थितो अपि त्वया हितमेवाचरिष्यतीति मन्यते। अग्रेसरत्वमग्रेगच्छ
ति अग्रेसर इवाचरतीति वा। तदित्थमपचयव्यतिरेकाभ्यां वाच्यवैशिष्ट्यहीनादेव व्यंग्यप्रतीतिः। तोमि इति। नोदयत्वनाक्रमे
नाः श्वश्रूर्गिरहत्तरे सकले। दोणमात्रं यथा संध्यायां तयतिनयात्तवति विश्रामः। अत्र तटस्थोन्यपुरुषस्वकुटुपपतित्वेनानक्षित
घ्रसंनिधिवैशिष्ट्यहीनादेव व्यंग्यार्थप्रतीतिरिति। सुधइति। श्रूयते समागमिष्यति तव प्रियो प्रहरमात्रेण। एवमेव। किमि
ति ष्ठसि त सखि सज्जय करणीयं। अत्रोपपतिमिति। सोयमर्थः प्रकरणवैशिष्ट्यावगमात्प्रतीयते। अन्यत्रेति। अत्र। स्मिकरो
मीति। अत्राहं करोमीत्यर्थः। अत्रेति। सख्यान्यत्रे चलितेति विजनोयं देश इति प्रच्छन्नकामुकोत्रप्रेषणीय इत्याश्वस्तो रहस्यचय
स्यां प्रति कथायितद्योत्यते। यद्वा विविक्तोयं देश इत्याश्वस्तां जातविश्वासां प्रतिप्रच्छन्नकामुकस्त्वया विसर्जनीयोत्र सख्यः। सं
निहिता इति रचनाहृदयवनीय इति। अत्रपचाद्वयेपि वा सोर्थः साधारणसरणी। विनयः। प्रतीयमानस्य रहस्यव्रयस्याविनयइत
वोद्धव्यं। देशविशेषवैशिष्ट्यावगमादेव च प्रकृतार्थप्रतीतिः। गुरुजनेति। गुरुजनपरवश प्रिय किं भणामि त्वां मंदभागिनि

हं। अद्य प्रवासं व्रजस्यद्य मे यज्ञो नास्ति करणीयं। कयि देऽये निपाठस्तत्रात्रेत्यर्थः। गुरुजनपरवशेत्यनेन स्वानधीनत्वं तेन च निःस्नेहत्वं
व्यज्यते। किं नयनामीत्यनेनोपालंभस्याप्यविषयत्वं व्यज्यते। मंदभागिन्यहमित्यनेन स्वानधीनत्वं तेन च निःस्नेहत्वं व्यज्यते। एवमु
दासीने त्वयि या रूपा त्वा नामर्षयामि सा नाकलितकारिणी किमुपतप्यामीत्यादि परिदेवनं व्यज्यते। व्रजसि व्रजेत्यनेन गाढतरमन्यु
रूपालिंगायाचेदनेन मा व्रजेति व्यज्यते। अथ चेत्यनेन यत्राचिरप्रवासिनो विरहमायांति तस्मिन् मधावुपस्थिते तव गृहत्यागो नुचित
इति व्यज्यते। स्वयमेवेमादिना स्वोल्लंघ्य निवृत्तिर्व्यज्यते। अत्राद्य मधुसमय इति। सोयमर्थो वाच्यार्थव्यंग्यो वसंतरूपकालेन च
।शिष्ठ्योवगमात्प्रतीयते। अत्र चेष्टयेति। इदमपि वाच्यार्थव्यंग्यं। चेष्टाविशिष्ठ्योवगमः स्फुट एव। प्रत्येकव्यंजकत्वं तु काव्यदर्पणेन
संधेयं। ननु वक्त्रादिवैशिष्ट्यस्योदाहृते किं ढिकादिभेदोदाहरणेनेत्यत आह निराकांक्षेति। प्रत्येकमेव वक्त्रादिवैशिष्ट्यस्य व्यंज
कत्वावगमाद्विच्छिन्नजिज्ञासुर्निराकांक्षस्तत्प्रतिपत्ता भवतीत्यर्थः। अत्रालीच्यानेनेवीजमाह प्राणावसरतयेति। अत्र ढिकादिभेदेन
इत्थं तं च पूर्वालिनमेवोदाह्रियत इति तु प्रक्रम्यमाणापेक्षया। अतिदिशति। अनेन क्रमेणेति। सर्वेषां प्रायशोप्युदाहरणानामित्यनेनैवा
र्थव्यंजकत्वे दर्शिते किमनेनेत्यत आह निराकांक्षेति। उदाह्रियत इति तु वर्तमानसामीप्ये वर्तमानवद्वेति प्रक्रांतापेक्षयैवाक
मित्यपि वदंति। उदाहरंति अत्राहेति। श्वश्रूरत्र शेते अत्राह दिवसएव प्रलोकय। मा पथिक रात्र्यंधशय्यायामावयोः शयि
ष्ठाः। अत्रावयोरित्यनेन श्वश्रूशय्यासाधारण्येन स्वशय्यामुपदर्शयंत्या परस्योद्दीपनं वार्यते। अत्र वक्तृप्रतिपाद्ययोः प्र
सिद्धव्यभिचारयोर्वैशिष्ठ्यावगमात्प्रकृतार्थप्रतीतिः। एवं च प्रत्येकं वक्त्रादिवैशिष्ट्यस्य व्यंजकत्वेपि ध्वनिदार्ढ्यः समाज
प्रत्येकावधृतसामर्थ्ययोर्दण्डयोरिवैकघटकरणायेति भावः। नन्वेकोदाहरणे शुद्धशब्दार्थयोर्द्वयोरपि व्यंजकत्वोक्त्या पम
र्थमात्रव्यंजकत्वमत आह शब्दप्रमाणेति। पदांतरप्रतिपाद्यमानस्याविप्रकृतार्थव्यंजकत्वात्तत्परिवृत्त्यसहत्वेन शाब्द
स्यात्प्राधान्यमत एवार्थप्राधान्यादर्थव्यंजकत्वयुक्तमिति भावः। नहीति। एतदपि प्रकृतानां। अभिप्रायः। अत्र शब्दात्मकनेत्र
त्रिसंध्यादेरपि व्यंजकत्वादिति समर्तव्यं॥ ॥इति मधुमत्यां तृतीय उल्लासः॥ ॥ननु काव्यस्वरूपे तद्विशेषलक्षणे प्रोक्ते
प्राधान्यावसरतया दोषादीनां तन्निरूपणमुचितं ननु पुनः काव्यभेदप्रदर्शनमित्याह यद्यपीति। ध्वनेः। विमर्दाक्षितेषां कव्य
नेति दोषः। पूर्वं ध्वनिप्रदर्शनस्यैकदेशत्वादिति भावः। यद्यपि पूर्वमप्यनेकप्येच्छया साकल्येन प्रदर्शनमसंभावि तथाप्य विवा
क्षितवाच्यत्वादिरूपोपाधीनां साकल्येन प्रदर्शनमिह विवक्षितं तत्रोपरिष्टाद्व्याकर एव स्फुटं। तत्र यद्यप्येषां व्यंजकोपाधी
नां पंचमे गुणीभूतव्यंग्योपाधीनामष्टमे चोपाधीनामिति समर्थ्यां धर्माणामिति। यद्धर्मविशिष्टानां हेयता याद्विशि

ष्टानां वोपादेयतेत्यर्थः। तत्र दोषविशिष्टानां हेयतेति तदभावविशिष्टानामुपादेयतागुणालंकारयोस्तु स्वरूपतएव तथात्वमिति निर्म
।तत्वं। यथाश्रुते तु दोषस्य काव्यधर्मत्वानुपपत्तेः असंगतिरेव स्यात्। रसादिनिरूपणं विना दोषादिनिरूपणमेव न स्यात्। तेषामु
।तालंकारा ताः साक्षात्परंपरया वा रसाश्रितत्वात्। रसपदं च सर्वत्र व्यंग्यमात्रपरं। रसस्य मानसत्वगुणो योगादि समा सिद्धय
।रतया। प्रथमं काव्यस्येति तत्र काव्यपदमुत्तमकाव्यपरं प्रकरणात्। यद्वा सामान्यपरमेव पूर्वतावद्दोषनिरूपणाद्यपेक्षयेति यथा
६ श्रुतमेव सम्यक्। उक्तलक्षणाप्रकारेषु उपादानलक्षणालक्षणयो रूपयोगं दर्शयति। अविवक्षितेत्यवाच्य इति। योऽविवक्षितवा
च्यः स ध्वनिरिति ज्ञेयः। तत्र चाविवक्षितवाच्यध्वनौ वाच्यमर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतं भवेदित्यर्थः। लक्षणामूलेति।
अत्र विवक्षितान्यपरवाच्यध्वनिव्यवच्छेदाय लक्षणामूलेति विशेषणं। गूढपदं चागूढरूपगुणीभूतव्यंग्यव्यवच्छेदाय। स्निग्धश्या
मलेत्यादावलेततिरस्कृतवाच्यत्वा रामपदमर्थान्तरे संक्रामयन्त्या वाच्यसिद्ध्यंगीभूतेति वाच्यासिध्यंगत्वात् गूढव्यवच्छेदाय प्राधा
न्ये सतीत्युक्तं। एवं च यतो लक्षणामूलमप्रधानमत एवाविवक्षितवाच्यमित्यर्थः। लक्षणपरतया व्याख्याने तु तारस्पतीकं
वैयर्थ्यापातात्। स ध्वनाविति इति। स ध्वनिरिति ज्ञेयः। हेत्वपेक्षायामाह ध्वनावितीति। अयमभिसंधिः। तत्र ध्वनौ विवक्षितेन
ध्वनित्वमनूद्य तत्रार्थान्तरसंक्रमितत्वादि विधीयते न त्वविहितस्यार्थवाच्यता संभवतीति। कथात्र ध्वनित्वविधानं श्रूयते इत्य
तः स ध्वनिरिति शेषं कृत्वा व्याख्यायो जितमिति। तत्र वाच्यमिति। अनुपयुज्यमानवयेति श्रुवता तात्पर्यानुपपत्तिस्तद्धि षयीनु स्त्वा
पपत्तिर्वार्थान्तरसंक्रमितवाच्यं ध्वनिमूललक्षणाबीजमिति द्रष्टव्यं। त्वामस्मीति। अस्मीत्यस्मच्छब्दार्थानुवादकमव्ययम
तएव च वच्मीति नोत्तमपुरुषानुपपत्तिः। समवायः समूहः। अत्रेति। विदुषां समवाय इत्यादिनेव प्रकृतार्थकान्तेव च्मीति नु
त एव च वच्मीति नोत्तमपुरुषानुपपत्तिः। धर्मधर्मिभावः संबंधः। उपदेशार्थे लक्ष्यं। तथा च त्वामुपदिशामीत्यर्थः। मद्वचनं च सर्वमेव लक्षयोप
प योगानामपर्यानुपपत्तिः धर्मधर्मिभावः संबंधः। अतएव वाच्यस्य परित्यागो विसंगतते। सत्येव वचनस्वरूपे धर्मि विउप
देशत्वेन ज्ञातव्यमिति उपदेशरूपप्रतीतिश्च प्रयोजनं। अतएव वाच्यस्य परित्यागोऽपि सामान्यविशेषयोः संबंधः। सक
देशस्य धर्मान्तरापत्तेः। आदिपदान्मतिमात्रस्यानुपयोगितया प्राप्तानिकमति वं लक्ष्यं। सामान्यविशेषयोः संबंधः। सक
त्वा लवादिविजयो वाच्यः। यद्वा दानक्रियायामूर्तिमात्रसाध्यत्वया मतो वाधात्स्प्रातिमात्रे लक्षणा प्रतिपत्त्यतिरस्कृतवाच्योदाहर
णमिदं। आदिपदग्राह्यं त्वसद्वृत्तचारतादिजन्यं। यथाहोति कमलाई कमला इत्यत्र द्वितीयकमलपदं सौरभ्यादिसालि
परमिति। तत्र। आदानवत्सादिरपि मतावसूतायां वाधात्सा ग्राप्तिर्वैद्धी धियवस्तितायदितदादानमपि बोद्धमेवेति ध्वाभूतम
तोतद्वाच्यः। अत्रेऽकपक्रमादादिपदग्राह्यमव्येतनमध्वनि। धिद्धमतितदुपादानमितिसंदर्शितविरुद्धं। इदं तु विचारमहीतेत्यलं।

लक्षणार

ताः प्रविशंतीत्युपादानलक्षणामूलव्यंग्यं ध्वनितमित्युक्तं। न तावदस्मिंत निरस्य तु वाच्यस्यार्थपरित्यागात्। नाप्यवांतरसंक्रमि
तवाच्ये परिणामरूपसंक्रमस्याभावात्। नहि वचनीत्यत्र वचनरूपधर्मिणा उपदेशत्वरूपो ऽवांतरापन्निय दत्र कुंतस्य धर्मिणोरू
पांतरापत्तिरस्ति कुंतत्वेनैव तत्प्रतीतेः। पुरुषस्य कुंतवत्त्वेनोपस्थितावपि परिणामित्वाभावात्। परिणामित्वे च कुंतस्य लक्ष्य
पुरुषधर्मत्वात्। कथं वा लक्ष्यतावच्छेदकरूपतान्यत्रावधारिता लक्ष्योपस्थितिर्वचनी सादौ परिहार्येति। उच्यते। सतारूपा
नरापत्तेः परिणामत्वात्तत्संबंधधर्मधर्मिसाधारण्यं एवं च धर्मिपरिणामो धर्मः धर्मपरिणामश्च धर्म्यपि च तत्रा प्रोक्तं वचनीत्यादौ द्वि
तीयस्य कुंताः प्रविशंतीत्यादौ। कथं वेत्यादि हृन्यंतः घटे तयोर्यदि तथा नियमः स्यात् न चैवं किंतु प्रयोजनप्रतीत्यनुरोधेन लक्ष्यो
पस्थितिरिति क्वचित्तथा क्वचिदन्यथापि तदुपस्थितेः। कुंतादि त्रिसंयोगाश्रयत्वेन कुंतपुरुषयोरुपस्थितिरिति तु मते सर्वसम
जसं। क्वचिदिति। अनुपपद्यमानतयेत्यनेन मुख्यार्थबाधो मूलमिहेत्युक्तो नाति। उपकृतमिति। अत्र विरोधित्वसंबंधेनापका
रो लक्ष्यते ऽपकारित्वरूपकरणा बाधात्। तदुपस्थितिरूपकृतत्वरूपेण प्रयोजनप्रत्ययानुरोधात्। यद्वा अपकारत्वेनैव वदु
पस्थितिस्तस्य दर्शितपाद्यव्यज्ञानानंतरं तत्प्रतीतिरेवमन्यत्रापि बोद्धव्यं। व्ययापकारकृते पुनर्भवा प्रियमेवोच्यत इत्या सप्रकृ
बो व्यज्यते। सुजनतया दुर्जनता। सखितया शत्रुता। सुखितासनेन दुःखितासनं लक्ष्यते। संबंधप्रयोजने पूर्ववत्। एवं धर्मि
ति। यलक्ष्ये क्वचिद्धर्मव्यंग्यता कुंताः प्रविशंतीत्यादौ। एवं हि कुंतिना धर्मिता लक्षणया कुंतत्वं धर्मो व्यज्यते। क्वचिद्धर्मलक्ष्ये
धर्मिव्यंग्यता यथा नववधूजीवसुप्यच्छायमुख्याचलसुविधिविधमित्यादौ। अत्र गाढाश्लेषे धर्मे लक्ष्ये प्रत्युपकारं तस्य धर्मिणो व्यं
ग्यता। क्वचिद्विशिष्टे लक्ष्ये विशेषांतरस्य व्यंग्यता यथा। यदोधि अपराधोऽदृष्टो द्वितीयचंद्रपदकलंकीत्यादि विशिष्टलक्ष
कं तेन न तदाननान्निकृष्टत्वं धर्मांतरं व्यज्यते। क्वचिद्धर्मे लक्ष्ये धर्मांतरमेव व्यंग्यं। यथा सुखविकसितस्मितमित्यादौ सा विशि
पत्वं लक्षणा सोरणातिशायो व्यज्यते इत्यविवक्षितवाच्यभेदा जहल्लक्षणीयाः। संप्रति विवक्षितवाच्यं लक्षयितुमाह। विवक्षितानि
ति। अत्रापि ध्वनिमिति शेषः। न सोपयोधनिरित्यर्थः। विवक्षा च बाधाभावः। ननु च कुमिच्छाऽविवक्षितवाच्येपि गतत्वात्।
पदाद्यांशवाच्यादुस्य मुपतिष्ठत इति तत्रापि विवक्षासत्वात्। एवं च प्रकृते वाच्यबाधाबाधाव विवक्षाविवक्षे इति द्रष्टव्यं।
अन्यपरं व्यंग्योपसर्जनं नु व्यन्यतात्पर्यमित्यर्थः। तादृशं किमूलध्वनो विवक्षितवाच्यविशेषोऽव्याप्तेः। न हि तत्रापरार्थोपि वाच्यस
यें। तथा सत्यनियये वोत्तयोपस्थितौ व्यंजने यन स्यात्। अतएव दृष्टो व्यंग्यपानिष्ठमिमस्य कं। एतद्धि तज्जनेकोपीति। अत्र रसस्य प्रा
ध्यान्यमाविष्कर्तुं प्रथममलक्ष्यक्रमनिरूपणं। यद्यप्यलक्ष्यक्रमस्य लक्ष्यक्रमालावैतया तन्निरूपणाधीननिरूपणत्वेन प्राकृदे

५५ र्यो न युक्त इति। तदुक्तं। अलक्ष्यक्रमत्वं हि न लक्ष्यक्रमत्वाभावः अविवक्षितवाच्येपि गतत्वात्। किं तु नीलपीतयोरिव परस्परविरुद्धव्याप्यत्वेन
नुप्रतियोग्यनुयोगिभावः। अत एवानुस्वानाभसंलक्ष्येति वक्ष्यति। यथा चंद्राभिघातानंतरमविच्छेदेन क्रमवतो ध्वनयः श्रूयंते तथा शब्दोच्चा
रणानंतरमविच्छेदेनैव क्रमवतो वाच्यव्यंग्यादयः प्रतीयंते। अत एवाविवक्षितवाच्येन तद्भेदद्वयं बाधेन वाच्यविच्छेदादिति द्रष्टव्यं। ननु शब्दक्र
९ यनंतरं विभावादय एव प्रतीयंते न त्वन्यत् तथा च लक्ष्यक्रम इति न युक्तमिति न त्वलक्ष्यक्रम इत्यत आह। न खल्विति। न हि विभावादय एव तत्र
तीयंते किं तु तदुपकृतमन्यदपीति। लक्ष्यक्रमत्वं नोपपद्यत इत्यलक्ष्यक्रमत्वमुक्तं। उपकार्योपकारकयोः प्रतीतिर्भुक्तिरभिव्यक्तिर्वा। अत एव
धा सौरभ्य नैवोक्तमपि तु रसस्येति। अलक्ष्यक्रमं विभजते। रसभावेति। अक्रमो लक्ष्यक्रम इत्यर्थः। वस्तुतः क्रमसत्वादिति भावः। अत्र रस
भावतदाभासप्रशान्त्यादिरिति वक्तव्ये भावग्रहणं रसशान्त्यादिप्रतिषेधार्थं व्यभिचारिपरं। तथा हि। रसस्य विभावादिजीवितावधित्वेन तदपगम
एव शान्तिर्वक्तव्या न च तदनुपकृतो व्यंजनया प्रतिपाद्यते न चाव्यक्तस्य मत्कुरत इति रसशान्तिर्नोक्ता रसोदय इत्युक्त रसाभिव्यक्तिपर्यवसन्न एव
तस्य नित्यत्वात्। रससंधिशबलते न संभवत एव। रसानामविगलितवेद्यान्तरत्वात्। नापि स्थायिनां विभावाद्यसंबलेन रसतया तेषामनभिव्य
क्तेः तत्संवलने रसतापर्यवसानेन विगलितवेद्यान्तरत्वादेव। ननु रसादयो रसवदलंकाराः ते गुणीभूतताभिधानेऽभिधातुमर्हा न तु ध्वन्यभि
धानत्वं तत आह। भिन्न इति। तथा च रसादीनां यत्र पराङ्गता तत्र गुणीभूतव्यंग्यत्वमन्यत्र प्राधान्यतया ध्वनित्वमित्युभयत्रापि धानमविरुद्ध
मिति भावः। कारणानीति। कारणं तत्तद्रससमुचितमङ्गनायौवनादि कार्यं स्वेदादि सहकारिणश्चिंतादयस्ते यदा काव्ये नाभिनयेन वा प्रतिपा
द्यंते तदा विभावानुभावव्यभिचारिसंज्ञां लभंत इत्यर्थः। रत्यादेः स्थायिन इत्यन्वयः। तादिति। हेतोरित्यर्थः। क्वचित्तु अनुभावानुभाव[illegible]
श्चेति पाठः तत्रापि चकारस्यायमेवार्थोऽव्ययानामनेकार्थत्वादिति। अयमपि संधिः। लोके सरागस्य पुंसः स्वादृशः सुदृशो बादर्शनश्रव
णादिना मिथः प्रथमं युगपद्युगपद्वा प्रीतिरूपं घटते तत्र रूपशीललावण्ययौवनतज्जन्यचेष्टालंकरणं चंद्रसमीरणादयापि प्रीतिस्फु
रणादकपरस्परज्ञानस्य सहकारितामंजलंते ततश्च जातप्रीत्योर्यूनोर्मिथोभिलाषो जायते अमुमेव बोधा रतिमित्याचक्षते। ततश्च नि
धो लाभोपायं जिज्ञासमानयोश्चिंता ग्लानिविषादादयः प्रादुर्भवंति तदनु प्रीतिचिंतादिजनिता स्तदुभयोर्न्नायकाश्चेष्टा जायंते तेतदनंत
मा रमुपायेरूढयोः स्वयंदूतादिना वा सति संगमे प्रीतिरनुवर्त्तते चिंतादयोऽपगच्छंति तत्र प्रीतिः स्थायिभावः। चिंतादयो व्यभिचारिणः। तदुभय
प्रकाशिकाश्चेष्टाः अनुभावाः। स्थायिनो विषयश्चालंबनविभावः। आलंबनान्यस्यापि जनकालंबनज्ञानविषया रूपशीलादय उद्दीपन
विभावाः। तद्भूतया ज्ञानस्यालंबनस्य प्रीतिस्फुरणादकत्वात्। एवं च तद्भूतयालंबनज्ञानं जनकं। इयं ममाऽहमस्या इत्यादिरूपं प्रीत्यादि
नामकं ज्ञानं जन्यमिति द्रष्टव्यं। इदं तत्र ध्यातव्यं। या यौवनोद्धताश्चेष्टास्तासामुद्दीपने। यास्तु प्रीत्यादि तु निता स्तासामनुभावे तर्भावः।

प्रीतिजनकज्ञानविषयत्वाच्चित्रे बेपिशुधानौ कारतामेव तत्कुतो दृश्यस्फकारतोन्यथ्यदीपकाभि। अत एव संगतयोरपि तदा लोक
नाद्ये नोपचिकारो जायते। उद्दीपनं च प्रीतेरस्ति लोके जनयितृत्वे च लक्षणसहकारिसमवधानं। नचात एवोद्दीपकत्वयाऽन्यथासिद्धत्वान्नवा
निकारतानीतिवाच्यं प्रीतिजनकज्ञानविषयत्वेनालंबनत्वेऽकारणत्वात्सहकारितयोद्दीपकत्वात्। एवं सर्वरसेषु ज्ञेयं। व्यभिचारिमतं प
त्तं सिद्धं यद्वा हत्थ्यक इति। व्यक्तो दध्योदिवारूपोत्तरतामापन्नो ननु घटदीपयोरिव पूर्वसिद्धयोः प्रत्याय्यप्रत्यायकभावः किंतु ज्ञानवि
षयीभूयैव। स्थित्यक इत्यर्थः। अत्र ते व्यक्त इत्येतावतैव सामंजस्ये पुनर्विभावादिग्रहणं नामीप्रत्येकं रसीभवितुमीशते किंतु मिलिता ए
वेति विभावयितुं एतदग्रे स्फुटयिष्यति। लोके हृद्रसमतिमाह उक्तं चेति। चव्याप्नो भरतटीकाकारा इति संयोगानिःपत्तिपदयोः क्रमेणाते वा
व्याख्यानमाह एतदिति। भट्टलोल्लटादय इति संबंधः। व्यभिचारिभिश्चेति। अत्र निर्वेदादिभिरित्यवधुनासंचितो नोवक्षध्वीहित्तेन श्लो
न्यादितिरित्यर्थः। निर्वेदस्य रसांतरानुपकारकत्वाद्वा। निर्वेदे च तस्य स्थायित्वादिति केचित् तन्न। निर्वेदस्य रसांतरानुपकारकत्वे अ
अ स्तियारित्वेपि स्थायित्वास्थितार्थमिति विरुध्येत। किंचाहमपितवस्तनावघविन्यस्य राज्यं विचिचरितं मृगयूथान्यप्राधिष्य वनानी
त्यादावुर्वशीविरहरं किनः पुरूरवसः सत्यपि निर्वेदे पुनर्नारीगमनेन तद्भावनिश्चये सत्यपि तत्र निर्वेदापगमेन तद्व्यभिचारि
त्वानुत्पत्तेः। तस्माद्यत्र रसे यो व्यभिचारी स तत्र व्यवहिते रूप चित इति यथाश्रुतमेवार्थः। काव्यमधिकृत्याह मुख्ययेति। अप्रतिधयेस
र्थः। अनुकार्यप्रतीयमानहृष्मश्चेतनेन संबंधः। इदमत्राकूतं। लौकिकसामग्र्यःपन्न एव रसो मुख्यः स च रामस्य पुरेव सीता गोचरज्ञा नी
नेन रतिरूपो जनितोनुभावेन प्रतीतो व्यभिचारिभिश्च पुष्टो न। त्विदानीं कान्यत्र नन्यते श्रूयते वा। यदा कुत्रापि स्पर्यतेनु नाध्य
तमिति। वस्पतिचवृत्तिकार एव पंचमो इद्दासे हृर्यपत्नेयमेसोयमितो रिचेत्यादि। एतेन नरामादावनुकार्ये रस उत्पद्यते तत्र त
दानीमसत्वात्। नाप्यनुकर्तरि नटे अभिनयाविष्टपि नत्वा तुसीतादीनामतदालंबनत्वात्। न सामाजिके नतएव सामाजिक
त्वादिशेषतायाम्प विरक्तयोस्तु प्रसंगाश्चेति निरस्तं। नाद्यमाधर्त्यमाह तद्रूपतेति। अनुकरणीयरामादिरूपतानुसंधानबला
दित्यर्थः। तथा च तद्रूपारोपान्निष्ठरसारोपो नट इति भावः।। कविनर्तकेपीति पाठस्तत्रापि नटेपीत्येवार्थो बोद्धव्यः।। नर्तकस्य
पदार्थाभिनेतृतया वस्त्वनुकर्तरि नटे तद्दसंभवात्। एवं च विभावरसयोः कार्यकारणभावः अनुभावरसयोर्ध्य प्रत्याय्यप्रत्याय
कत्वा वो व्यभिचारिरसयोश्च पोष्यपोषकभावः संबंधो निष्पत्तिरप्युत्पत्तिप्रतीतिपुष्टिभेदात्त्रिरूपेवतत्पावेदं सूत्रमेकतयापा
वतः प्रतीयमानमप्यकृत्सुरापात्रितयमिति ज्ञेयं। यस्तत्र कृतकपुतया कारतोः कार्यैः सहकारि। इति तिच्चर सांश्रपूकृतस्य
त्रस्य स्तद्वलौद्धुटमते लौकिकरसपरत्वनिर्णये व्यभिचारिसहकृतस्य स्थायिनोनुभावहेतुतयापि नक्रमेणाशाव्युत्क्रमो लंघ्य
ते। तथा च विवक्षावावस्थायिनस्तु समति व्यभिचारिताध्यस्य लक्षणसहकारिसमवधानरूपा पुष्टिरत्नसावा प्रतीतिरितिप्र

हृतसत्त्वाश्रयोऽस्य मते पर्यवस्यन्ति। राम एवायमिति। उपलक्षणमिदं अयं रामो भवत्येवेत्यतोऽपि भेदः। सम्यङ्‌ङ्‌थेति। अत्र सावधारणत्वे
सम्यक्त्वं। बाधकविरहस्त्वेव मिथ्यात्वेमिति बोध्यं। तेन प्रतीते ४ सम्यक्त्वाभावेन तत्परमसंभवि नटे रामत्वप्रतीतेर्भ्रमत्वमिति दूषण
मलग्नकं वेदितव्यं। ननु परप्रतीते रामत्वेदावगाहित्वेन रसानङ्गतया अवच्छेदेऽपि साधारणताप्रतीतिर्निवेलक्षणत्वापत्तिधाने कुतइतिवे
10 त्वान। अतिरिक्ते व्यवच्छेदभाने तु यावत्तत्प्रत्ययस्यापि रसानङ्गत्वात्तेबाधिगलितत्वेघातरत्वात्। वक्ष्यमाणानुमितिहेतुलिंगपरा
मर्शोपायमाह सेयमिति। सुधूरं निर्मलं। अत्र मनोरथश्रीर्मनसि एवत्तवतीति मनस इत्युन्मयोगव्यवच्छेदार्थं। तत्साधको ननु विद्धत
चिद्दृतीत्यत्र द्वितीयपविदं तिपदं चादितिवद्वंति। इत्यादीति। अत्रापि प्रथमेनालंबनविभावो द्वितीयेन चोद्दीपनविभावस्तु क्रुः। शिरोदोष्मा
सेनेति। शिरोदोष्माभ्यासेनूनिर्यीति नं जनिवेयस्य कार्यव्यभिचारिकार्यरोमांचादितत्प्रकटनेनेत्यर्थः। यद्यपि चानुभावव्यभिचारिणोऽ
पि काव्याद्युपस्थितिर्नाद्येभयत्वेवलत्वापि नाद्यस्या जिनेयत्वात्तत्पुव चमत्कारानुसंधानं चात्तयेवक्रम आहतोऽन्यथा काव्यरसादविशे
षप्रसंग इति स्मर्तव्यं। एवं यत्र ह्याधिभावस्य प्रत्यक्षो रोमांचादीनां तद्रूपाधिगमाद्व्यभिचारिणामुपस्थितिस्तत्र स्तनदामसत्वसंस्कारज
न्यतावक्रोयरस्मृतिस्तुतो मनसा न सहृदयेन प्रतीत्यूतनट इत्युक्तित्वज्ञानेमिति प्रघट्टकतात्पर्यं। न च व्यभिचार्यजन्यपरोमांचादिना कथं त
दनुमितिरत आह कृत्रिमैरिति। नहि स्वरूपसत्तत्तोपस्थापिनो व्यभिचारिणो भावानुमा तुमीयते किंतु ज्ञाताः। ज्ञानं च चमत्कृपथिरोबाद
त्रीनंददशायामिहापि न विरुद्धं नटे रामत्वारोपे वा भ्रमस्य सुश्लिष्टत्वात्। गम्यगमकत्वाच्च रूपादिति। व्यावहारिकत्यर्थः। रसस्यानुम
यत्वेव हृद्यानुमितावपि चमत्कारानुपपत्तिरत आह वस्तुकसौंदर्येति। अनुमीयमानं रत्यादिपदार्थस्य प्रकर्षकाष्ठाप्राप्तं मनोहर
रत्वं च स्कसौंदर्यं तद्दर्शनादित्यर्थः। एवं च विभावमाहात्म्याद्देव चमत्कार इति तात्पर्यं। अनुमानचर्वणीरं च। रामायसीतालेयनकष्टं
गाराश्रयः। तद्विभावादिसंबंधित्वात्। नयदेवनवदेवं यथाहमिति। काव्ये भट्टलोल्लटमतात्सेद इति तत्र विरोधो न दर्शितः। भेछा
यकमतमपचारयति न तादृस्थ्यनेति। ताटस्थ्यं नटहृदि निष्ठत्वं। आत्मनिष्ठत्वमनुकर्तरि नियनिष्ठत्वं। एवं चानुकर्तरि चानुकर्तृनिष्ठ
त्वं निरस्य वा सामाजिकनिष्ठत्वं दर्शितं। नो सच तेनाभिव्यज्यत इति। तत्रोत्पत्तिपक्षे च वक्ष्यमाणदूषणं व्यक्तिपक्षे तु व्यंजना
यां प्रमाणाभावाच्चरइति हृदयं। अभिधातो द्वितीयेन लक्षणातो लक्षणातो द्वितीयेन त्वपि द्रष्टव्यं। न चेसीतादिपदं तात्पर्यानुपप
त्तिमूलकलक्षणायास्त्रीत्वोपस्थापकमस्करसादिप्रतीतिस्कप्रयोजनमिति किंतावत्कव्यव्यापारेतो निवार्यं। एवमर्थान्तरसंक
मितथा व्यतया रसादिध्वनिर्नाम विचारितं तथा व्याप्तावापत्तेः। नचेष्टापत्तिरपसिद्धान्तात्। अजनानंगीकारात् द्व्यतः प्रयोजना
प्रत्यये न लक्षणानुपपत्तेः। प्राप्यमानः साधारण्येन विषयीक्रियमाणः इत्यर्थः। सत्वोद्रेकेति। सत्वं गुणो विशेषस्तस्य स्फोटे
कोरजस्तमः संवलनाभावस्त्वेन प्रकाशः स्फुटतरोय आनंदः तन्मयीनदाप्तिकापासविचित्रया विश्रांतियोगिनो विगलित

वेद्यांतरत्वेनास्थितिसत्वसत्वेन तत्समानत्वेन समाध्यवस्थातुल्येनेति यावत्। भुज्यते विषयीक्रियत इत्यर्थः। तदयमर्थः। भावकत्वव्यापारेण साधारणीकृ
तेषु विभावादिषु येन चमत्कार आधीयते स व्यापारो भोगः। एवं च साधारणीकरणात्मा भावकत्वव्यापारश्चमत्कारात्मा भोगव्यापार इति सिद्धं। तदुक्तं भट्ट
नायकेन। यद्यप्यभिधाभावकत्वलक्षणमेव व्यापारद्वयं काव्ये प्रधानं तथापि न तावन्मात्रे विश्राममर्हति तदुभयोत्तीर्णो रसचर्वणात्माभोगापरपर्यायो वि
श्रांतिस्थानतया प्रधानमिति। गुरुपादमतमवतारयति। लोक इति। काव्यनाट्यव्यतिरिक्तस्थल इत्यर्थः। अभ्यासः पौनःपुन्यं तेन पाटवप्रज्ञातिशयस्त
द्वतां सामाजिकानामित्यनंतरोक्तेन संबंधः। एवं च लोके नायकादिवृत्तांतदर्शनेन येषां स्थाय्यनुमानाभ्यासपाटवं त एव रसिकास्त एव चात्राधिकारि
णस्तदन्ये तु काव्यनाट्यशालां ततः पातिनोपि स्तंभकुंभायमानादिति नातिप्रसंगः। अनुमानं चायमेतद्विषयकरत्याश्रयः तत्सामग्रीमत्वात् तत्कार्यवत्वाच्च
न यदेवं न तदेवं यथा विरक्त इति। एवं च योगत्रेस्थाय्यनुमानाभ्यासपाटववान् स तत्राधिकारीति द्रष्टव्यं। विभावनादीति। तत्र विभावनं सामाजिकरत्या
देरास्वादांकुरयोग्यताप्रापणं। अनुभावनमेवंभूतस्य रत्यादेः समनंतरमेव भावनं व्यभिचारणं तथाभूतस्यैव तस्य सम्यगभिव्यक्तिः। तदपि साधारण
कारकं तज्ज्ञानात् स्थायिनि तत्तदंशाव्यक्तिरत एवार्थान्न रसाभिव्यक्तिः। व्यक्तिश्च स्थायिनः तत्तद्देशिष्यविषयत्वमेव न ह्यविभावितोनुभाव्यते। न चाननुभा
वितो व्यभिचार्यत इति। एवं च यथा बीजस्य धरणिसंबंधः ततोपि लाववत्वाकुराः क्रमशो भवंति तथा स्थायिनोप्यंकुरावस्था इति ध्येयं। उक्तं च। विभावा अनु
भावाश्च सात्विका व्यभिचारिणः। प्रतीयमानाः प्रथमं खंडशो यांत्यखंडतामिति। एवं च पूर्णव्यंग्यस्फोटस्य यथोत्तरोत्तरं व्यभिप्रकर्षस्तथा विभावादिव्यंग्य
रसस्यापीति बोद्धव्यं। ननु सीतादीनामतदालंबनत्वात् कथं सामाजिकानां सीतात्वेन ज्ञानतां रसाभिव्यक्तिरत आह। ममैवेति। अत्र संबंधिविशेष
स्वस्वीकारस्तन्नियमः संबंधिविशेषस्त्यपरीहासस्तन्नियमश्चेत्यर्थः। तदाह। यस्याः प्रतीतावदमकमपि नभासते सा। रसाभिव्यक्त्यनुकूलेति तात्पर्यं तत्रा
पि संबंधिविशेषस्यानौचित्यादितरेषां च रसस्य विगलितवेद्यांतरत्वात्परीहारः। तादृशी च प्रतीतिर्नो चेत् प्रत्यक्षात्। काव्येपि भूयन्यं नासमंजसं विलोकयत्रायनादु
क्तायेत्यादौ शब्दादेव तथोपस्थितिः। यत्र तु संबंधिविशेषवाचकसीतादिपदोपादानं तत्र समासोक्त्यलंकारेण नायकसामान्यवृत्तांतविषयाच्छब्दादेव
व्यंजनव्यापारात् काव्यनाट्योपदर्शितविभावादिज्ञानेन सामाजिकानां स्वस्त्रीविषयकरत्यादेरेव चर्वणमिति सीतादीनामतदालंबनत्वं न दोषाय आल
लंबनत्वेप्यालंबनसाधारणरूपेण ज्ञानात्। एवं च काव्यं शृण्वतो नाट्यं वा पश्यतो यावदयं राम इयं सीतेति बुद्धिस्तावन्न चमत्कारोऽनौचित्यात्। यदा तु नायक
त्वेन नायिकात्वेन च ज्ञानं तदा स इति सर्वानुभवसाक्षिकं। वासनात्मतयेति। वासना संस्कारस्तस्यात्मा स्वभावः सोस्त्यस्मिन्निति यावत्। तेन सूक्ष्मतया स्थित
इत्यर्थः। न च सूक्ष्मत्वे चमत्कारानुपपत्तिः। विभावादिज्ञानसंवलितस्य तस्याविर्भावाभ्युपगमात्। तज्ज्ञाननाशे च तिरोभावः। प्रकृतेरिव सांख्यानां। अस्मण
दृष्टवदांतिनां प्रकृतिविकारयोरभेदाच्च स्थायीभावो रसः स्फुट इत्याद्युपपद्यते। आविर्भावतिरोभावदशायो रसत्वस्थायित्वाभ्यां व्यपदेशात्। न चावि
र्भावाभ्युपगमे नित्यताविरोधः। परिणामिनित्यताभ्युपगमेन सत्कार्यवादाभ्युपगमात्। यत्तु संस्काररूपतयास्थित इत्यर्थ इति। तन्न। संस्कारस्य जडत्वात्।
ज्ञानांतरग्राह्यत्वे स्वप्रकाशत्वाभिधानविरोधात्। नन्वस्तु विभावादीनां साधारण्यं स्थायिनस्तु कथं स्वीयमात्रविषयकत्वात् कुतः साधारण्यमत आह। नियतेति। निय

तत्प्रमातृगतत्वे सामाजिकनिष्ठत्वं। तत्काल इति। विभावादिसाधारण्योपस्थितिकाले विगलितायाः परिमितप्रमातृतायाः सामाजिक
निष्ठतायाः स्फुरणादुन्मिलितो वेद्यान्तरसम्पर्कशून्यो परिमितताया: सामान्यविषयत्वं यस्य स तथा तादृशेन प्रमात्रा अस्यापि रूपज्ञानेन गो
चरीकृत इत्यन्वयः। प्रकारान्तरेणाह साधारण्येनेति। सकलसहृदयसंवादभाजेति साधारण्येनेत्यस्य विशेषणं। तथा चोक्तप्रकारे
ण विभावादीनां साधारण्यं तद्वलात्प्रमातुरपि स्वस्य च साधारण्यं तेन रसोपि साधारण्येन विषयीक्रियत इति प्रघट्टकतात्पर्यं। ननु या
न्यसाधारण्यात् कथमसाधारण्यमिति वाच्यं। मापकसंदेहाद्व्याप्यसंदेहवदस्याप्यनुभवसिद्धत्वात्। तदिदमुक्तं सकलसहृदयेति।
स्वाकारवदिति। स्वाकारः स्वविषयः। अतिरिक्ताकारानभ्युपगमात्। एवं च चित्ततायाद्वितत्त्वमपि स्यादित्यतो विषयत्वमित्यर्थः। विभावा
दीति। विभावादेर्विगलितस्यापि विषयत्वं तदवधिस्थेन यावदेव विभावादयः स्थायिनि तासंते तावदेव रससचर्वणायुदयादुविभूयो केद्या
दीनि। विभावादेर्वि... एवं च विभावादिज्ञाननाशानाशप्रवृत्तिन्याय:। वक्ष्यमाणालौकिकचमत्कारकारित्वमाह पुरइवेति। स
हृदिनात स्फुरितवं घस्तदा नत्रिरोत्साय:। अन्यत्सर्वमित्यादिना विगलितवेद्यान्तरत्वमुक्तं। अम्लानदेत्यनेनालौकिकचमत्कारस्यानन्दम
यं शीणमिति त्यादिगलनक्रियाविशेषणं। अन्यत्सर्वमित्यादिना विगलितमिव घातरत्वमुक्तं। कथमिति चेत्। काव्यश्रवणनाट्यदर्शनदशायां करुणादि चित्तावादीनाम
यत्वमसिद्धमिति। ननु शृङ्गारे सुखास्वादः करुणादौ तु कथमिति चेत्। काव्यश्रवणनाद्यदर्शनदशायां करुणादिविभावादीनाम
यच्चमसिद्धं न। किं न तु शृङ्गारे सुखास्वादः अन्यदा तु दुःखजनकत्वेपि संयोगदशायां सुखदिनादुना देरियसर्वस्या। यिनां ज्ञानात्मकतयाज्ञान
दि सुखाभिव्यंजकत्वमेव स्वभावात्। अन्यदा तु दुःखजनकत्वेपि संयोगदशायां सुखादिवदलौकिकसुखस्यानतिव्यक्तेः। अश्रुप्रभृतिप्रवृ
त्त्यच सुखात्मकत्वेन सुखातिशयकावनुपपत्तेरभावात्। लोकेस्वरूपसतो यस्माद्युत्पत्तिः काव्यादौ तस्मादेव ज्ञा यमानात्तदा विभावादि॥ नचैवमेकदेशापत्तिः समाधेर्वि
त्तिरापनानुपपन्ना। लोके स्वरूपसतो यस्माद्युत्पत्तिः काव्यादौ तस्मादेव ज्ञायमानात्तदा विभावादेरित्यर्थः। हेतुमाह चित्तावादीति। निमित्तकारणनाशस्य कार्या
दृष्टमातात्वात्। सत्यायमिति। न काद्यापि कार्यसत्त्वमित्यर्थः। सतएव सद्भुत्पत्तेरभ्युपगमात्। हेतुमाह चित्तावादीति। निमित्तकारणनाशस्य कार्या
नाशकत्वादिति भावः। न च निमित्तकारणापेक्षा बुद्धिनाशादिद्रव्यनाशवदेतत्स्यादिति वाच्यं। द्वित्वस्य निरूपतयापेक्षाबुद्धिव्यंग्यत्वात्।
नत्वायमनुयोगस्तावापि तुल्यः। अस्माकं हि कारकमन्यदज्ञापकमन्यत्। तथा कार्यमन्यत् ज्ञाप्यमन्यदेव कार्यमन्यत्त्वारतामन्यादि
ति दृष्टानुरोधं परिहरत्यपि चित्तावादिज्ञानस्य कारकत्वं ज्ञापकत्वं चरसस्य कार्यत्वं ज्ञाप्यत्वं कार्यत्वं स्वस्वकारणात्त्वमित्यभ्युपगमोरसस्या
लौकिकत्वात्। दृष्टानुरोधे तदनुपपत्तेः। तथा निमित्तकारणनाशान्न कार्यनाश इत्यपि दृष्टानुरोधं परिहरत्यकारकज्ञापकोत्तया तर्क।
चित्तावादिज्ञाननाशात् इसनाश इत्यभ्युपगमः। कार्यत्वमात्राभ्युपगमेतु दृष्टानुरोधपरत्वज्ञातयात् विरुद्धस्याभ्युपगन्तुमशक्यत्वात्।
नापि ज्ञाप्यइति। नागन्तुकज्ञानविषय इत्यर्थः। अत्र हेतुः सिद्धस्येति। जन्यत्वे ह्यागन्तुकज्ञानविषयता। अस्य निस्प्रको
शपि रूपत्वात्। नचैवं सर्वदा चर्वणापत्तिरत आह अपिवित्ति। न कश्चिदिति। न कश्चिदृष्टमिति पाठे कारकज्ञापकाभ्यां विलक्षा
दिपश्चेत गूढाभिसंधेरुत्तरं न कश्चिदिति। अस्ति संधिसुषुप्त्यादितिश्रुदृष्टमितीति। क्रमेणोपायाद्भ्यां। एवं सति कारकत्वज्ञापकत्वप्रासं
दिपश्चेत गूढाभिसंधेरुत्तरं चर्वणाविषयत्वापि चर्वणाया भिन्नेयं तथापि निव्यभिचरविसत एव रूपान्तरापत्तिः। ननु सर्वथैवा
द्धिमन्यथा समर्थयितुं यतो नातिप्रस...

सचाद्दृति न दोषः। एवं च कश्चित् कार्यो ज्ञाप्यश्च कश्चिद् द्वयमुभयरूपः तृतीयमेव लोकोत्तरता। लौकिकेति। विलक्षणशब्दः असौ कमन्येति। ते
नायमर्थः। लौकिकप्रत्यक्षविलक्षणं तार्टस्थ्याच्च बोधशालिमितयोगिज्ञानविलक्षणं वेद्यसंस्पर्शरहितस्वात्ममात्रपर्यवसितपरि
मितेतरयोगिसंवेदनविलक्षणम् अत एव च यद्धेतोर्लोकोत्तरस्वसंवेदनं तज्ज्ञायरङ्गत्यर्थः। तार्टस्थ्यभेदः। अवबोधपदं कूलाकल्पस्यापुमाताप
र। तत्र लौकिकप्रत्यक्षस्यानुपयुक्तार्थविषयत्वात् तद्वैलक्षण्यं। मितयोगिज्ञानस्य भेदविषयत्वाद्धस्य च स्थायिविभावादिभेदानवगा
हितया तद्वैलक्षण्यं। परिमितेतरयोगिज्ञानस्य स्वात्ममात्रविषयत्वादिहेतुविभावादीनामपि भानात् तद्विलक्षणत्वमिति निष्कर्ष
प्रकाराशब्दो नात्मकेऽपि रसे कादाचित्कीत्वं ज्ञानमुपादाय तदुभयव्यवहार इति तात्पर्यं। प्रकारान्तरेण लौकिकत्वमुपपादयितुमाह तेन
ह कमिति। न निर्विकल्पकं न निर्विकल्पकमात्रं। नापीति। विकल्प्यमात्रं। अलौकिकेति। सूक्ष्मतादशायामिति शेषः। सूक्ष्मतां हि
विषयोपरागाभावः। अत एव तदानीं निर्विकल्पकरूपतया अप्पहागोचरत्वं। तथा च कथयस्थायी कालभेदेन निर्विकल्पकरूपः
सविकल्पकरूपश्च। अत एव कालभेदान्न विरोधोऽपि सूचयदिति। यथा रसः कार्यो ज्ञाप्यश्च तथा निर्विकल्पकः सविकल्पकश्च
त्वत एव लोकोत्तर इत्यर्थः। संप्रदायविदस्तु। नापि सविकल्पकमित्यत्र च। भिन्नमिति शेषस्तेन नोत्तरविरोधः। उभयात्मिकत्वे पूर्वोपि
। निर्विकल्पकभिन्नतया सविकल्पकत्वं विषयतयाऽनिर्विकल्पकत्वं यथापाद्यते तदा न विरोध इति वदन्ति। अत्र पक्षचतुष्टयं। तथ
मेऽभिधया रसप्रतीतिरित्यशुद्धं तस्यापदार्थत्वाद् वाक्यार्थत्वाच्च। नाद्योऽपि न द्वितीयः रसारोपो नानुभूयमानारोपः। तदनुत्वावकाशावात्।
अत एव न लक्षणयापि नारोपः। स्मरणस्यानुभवपूर्वकत्वात् कोप्यस्यानुत्पादकत्वान्निरासाच्च। द्वितीयो विषयादिवस्तुसौन्दर्यबलादेव यथार्थ
थानुपस्थितो चमत्कारस्तदा शृङ्गारादिपदादपि स्यात्। रसस्य च पूर्वमनुपस्थितत्वात् न च व्यतिरेकतो वा व्याप्तिग्रहणानुमि
तिः। न चरमो धर्मसीतालम्बनक इति साधारणतिश्चोपस्थिते वेति न व्याप्तिग्रहेऽनुपपत्तिः। लिंगोपहितलैङ्गिकत्वानास्फुपगमेन स्था
यि विभावादि विषयतयानुमितेरसविषयत्वपर्यवसानमिति वाच्यं। व्यासंगान्यथानुपपत्त्या रसास्वादनस्य धारावहनरूपतया
। सिद्धसाधने न पक्षताविच्छेदात् तन्न स्यात्। न चान्तरानुमित्सया पुनः पक्षता। रसस्य विगलितवेद्यान्तरतया तदास्वादे तदनुदयात्।
तृतीयेप्येकन्याये नैव साधारण्यप्रतीतौ भावकत्वव्यापारकल्पने मानाभावात्। सामाजिकत्वाविशेषेऽपि ग्राम्यविरक्तयोरप
तत्प्रसंगात्। कार्यत्वज्ञाप्यत्वयोरन्यतरव्येतुकदोषाद्बाहुल्यरूपतास्फुपगमेनुचतुर्थपक्षप्रयोगाद्येति चतुर्थपक्षो हृदि निधाया
ह श्रीमदिति। सोऽयमर्थः श्रीपदेनोक्तं वा चिन्ताकटाक्षितः। अस्ति न च पदेन ध्वनिटीकाकर्तृपुराणगुप्तपादः। जिस्वन न विरोधोऽत्र
नेदृश्य इति प्रतिपाद्यते। भरतसूत्रे मिलितविचित्तावादिनिर्देशप्रयोजनमाह व्याधावृय इति। न च केवलाद्विभावादितोऽपि योपह
साधिकारी तस्य तद् इति व्या। किं स्यादिति वाच्यं। एकस्यानेकरसाधिकारित्वसंभवेन दोषतादृश्यस्यात्। न चैमिलितविभावकत्वे
पियत्र विचित्तावानुभावव्यभिचारि णोसाधारणपदं तत्र शृङ्गारतया नकयोः किंचिन्निगमकं। एकस्यापि वांगनातनोः कुतापव्वे

न च परिशादूकामुकयोः प्रतीतिसत्वात्कामिन्याउत्सयविभावत्वे चिंतायाउ भयव्यभिचारित्वमकृपा तस्योभयानुभावत्वमिति याच्यं। अन्ये
षां साधारणत्वेप्यसाधारणत्वं व्यभिचारित्वमनुभावं वा समाक्षाय रसाभिव्यक्तिनियमात्। ननु प्रत्येकमपि रसोनुत्तम्य तद्रूपतआहृपि
यदिति। दूरादुत्सुकमिति। अत्र दृष्टिलज्जितो दाहरणो विस्तरभियोपेक्षितो। अत्रेति। यद्यपि प्रसादोन व्यभिचारी तथापि तेनस्व
12 हेतुभूतामत्तिरूपलक्ष्यते। श्लोको कार्थानुसंधाने नार्थनिर्धारितास्यमुख्यैकत्वात्। प्र॰णामानोमानइ विहिभूयते प्रियश्रूरताप
तितइतीदानीं प्रसादएवोचितइति प्रतिसंधानात्। तथापीति। कार्योन्नेयधर्मतो यथाकार्यमुन्नयनमिति सूतिरसूचवतो अनु
पाता अप्यनुमित्युपनीता रसचर्वणाविषयाः। न चैवं कष्टकल्पनया व्यक्तिरित्यनेन विरोधः। यत्र ह्यनुभावविभावयोः काव्योपा
तयोरपि प्रसिद्धानगम्यत्वं तत्र प्रतीतिविलंबेन दोषत्वात्। यत्र त्वनुमितेः संभृतसामग्रीकत्वेन प्रतीत्यविलंबस्तत्र द्विविध
त्वमेतस्य। तदिदं रसचर्वणातद्विलंबास्यामध्यवसेयं। रससामान्यं जन्यतां तु रसत्वमेव। न च तत्र मानाभावः। रसपदश
क्यतावच्छेदकत्वेन तत्सिद्धेः। तद्यवाधकाभावाज्जातिरखंडोपाधिर्वा। प्राद्यावसरतया रसं वित्तजवे। तद्विशेषानाहेति। यद्य
पि प्रकृततया अष्टौ काव्ये रसाः स्मृता इति वक्तुमर्हति तथापि सामान्यतो रसावगमे विशेषजिज्ञासायां विशेषाभिधाने
स्यवदिपरव्यवच्छेदपरत्वं स्यात्। प्रकल्पितेच नाव। तथा च श्रव्यकाव्ये शांतरसाभावाच्चात्र संग इति विशिष्य चोक्तं तत्र रविनिष्याद्यर्व
शृंगारत्वं। न च वत्सिमन्नत्र क्रियाविरोधः। स कार्यचारुत्वोपगमेन सामंजस्यात्। एवं रसांतरलक्षणमप्यूह्यं। तत्र प्रथमोद्दि
ष्टशृंगारविजृंभते संभोग इति। इष्टालिंगनाद्युपचा॥चा। सुष्ठुरतित्वं संभोगत्वं। तदन्याभावसुष्ठुप्रकृष्टरतित्वं विप्रलंभत्वमि
त्यर्थः। शून्यमिति। अत्र पत्युर्मुखमित्यनेनालंबनं शून्यमित्यनेनोद्दीपनं। शयनादुत्थायेत्यनेनौत्कंठालज्जितो व्यभिचा
ढूपो री शानेरित्यनेनरत्तमलंहृतो नुभावः। त्वं मुग्धा दीति। अत्र त्वं मुग्धा दीत्यनेनालंबनं पिनेचर्कचुलिकयेत्यनेनोद्दीपन
र्मप्रधायि निवीटिकासंस्पृशीत्यनेन तु त्पकालत्वं प्रतीत्योत्कंठालज्जितो व्यभिचारी। नीविकासंस्पृशीत्यनेनानुभावः।।
नयोदाहरणतायोरन्यतरवैयर्थ्यं। नायकालंबनस्याघेन नायिकालंबनस्पृहसंयोगस्पर्धात्वेन श्लोके नोदाहरणता। तत्र
योजनमपि नायकयोरालंबनत्वमाश्रयत्वं च समानमिति कथनो। अपरस्त्विति। अभिलाषणायोगः। विरहेणाकरुणापि
चिप्रलंभः संगृहीतः। न च करुणो न शृंगारस्तस्य शोकप्रकृतिकत्वादिति वाच्यं। प्रकृतजीवनं तथायातोऽन्यतरस्यापि
रतेरनपायात्। तत्प्रकृतिकस्य शृंगारस्यैव संभवात्। अतथाभूते करुणोसो लभ्यात्। अतएव रघुवंशे साहश्यप्रति
कृतदर्शनैरित्युभिधाय लोभप्रियानुगमनत्वरयासमिने इत्यनेन्तर अरभसुनमंदिरास्यतरे द्विशेत्यनेनेत्युपलक्षणंदि
।ष्टिता। अतएवास्थितापिरोषः शृंगाररसस्यव्यभिचारितां भजते। प्रेमार्द्र इति। अपराधसहस्रैरप्यविचाल्यमिति तस्मै वपतायः।

सएव परिचयातिशयेन रंजनरूपो रागः। नान्येहश्लोके विरलस्य नामापि नास्तीत्यत आह एषेति। चिरयत्यप्यलीकेपि वरहोत्कंठि
तोन्मना इति तदनुरक्ता स्यसत्यादि चिन्तावः। त्यामालिख्येति। कृतांतो दैवमित्यर्थः। यद्यपि प्रवासस्यैवायं भेदः संभवति तथापि पा
दुःखापहेतुको विप्रलंभो लंसः प्रवासपदेन गृहीतुं न शक्यत इति तदर्थं पृथगभिधानं। येहेत्यपि बंधनचिरप्रवधानस्यैव प्रवासपद
शक्यत्वात्तस्य चात्राभावात्। क्रमप्राप्तं विप्रलंभस्योदाहरति शृंगारवल्लीमीच वांतरभेदो वाच्य इति चिंतावयितुमाह हा स्वाधीना
मिति। आकूत्येति। अत्रालंबनं विदूषकमा रोदनाद्युद्दीपनं। लज्जादयो व्यभिचारिणः। वैवर्ण्यादयोनुभावाः। हा मातरिति। अत्र
मातृपदप्रतिपाद्यास्त्र्यालंबनं। अंगेषु कृतवह्न्युद्दीपनं। रोदनादयोनुभावास्तदनुमिता निर्वेदग्लान्यादयो व्यभिचारिणः। कृतमि
ति। अत्र गुरुवधहेतवो भीमादय आलंबनं तदायुधत्वमुद्दीपनं वैवर्ण्यादयोनुभावाः उग्रतादयो व्यभिचारिणः। क्षुद्रा इति। अत्रश्री
रामश्चालंबनं जलनिधिनियमनादिरुद्दीपनं वानरादिपरित्यागेन रामान्वेषणमनुभावः। हर्षादयो व्यभिचारिणः। ग्रीवाभंगेति। अ
त्र स्यंदनमालंबनं शरपतनोन्मुखत्वमुद्दीपनं ग्रीवाभंगादयोनुभावाः शंकात्रासादयो व्यभिचारिणः। भयादिसत्र भयत्रासत्रास
वाची। अत्र विवृतमुखत्वं पश्चार्द्धेन सर्वकायप्रवेशश्च निमित्तान्तरतोपि भवतीति स्फुटस्य प्रतीत्या चमत्कारानुपपत्तेर्व्यभिचारि
णोरपि त्रासश्रमयोः स्वशब्देनाभिधानं। औत्सुक्येन कृतत्वरेत्यादाविवानुक्तमेवेति। स्वपुष्टं विषमं। अपपाठः केचित्। अत्र शवश
रीरमालंबनं। कृंतनादिरुद्दीपनं नासाविकूणनादयोनुभावाः। ग्लान्यादयो व्यभिचारिणः। चित्रमिति। अत्र महानित्यादिकं निर्दि
ष्टरूपपश्चादिति। चित्रमिति योज्यं। अत्र पुरुषविशेष आलंबनं। निर्विकारत्वादिरुद्दीपनं नेत्रविकासादयोनुभावाः हर्षादयो व्यभिचारिणः।
एवं च रससर्वेणास्यानुभवसिद्धत्वादनुपात्तानामप्याक्षेपादुपस्थितिः। सात्त्विकानामनुभावविशेषत्वेपि तथास्यमतेतत्त्वेनोपयोग इति
कृष्णं दर्शिता। एषामिति। तत्र विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः। आत्मभावं नयत्यन्यान्स स्थायी लवणाकर इति। स्थायिसा
मान्यलक्षणं। विरुद्धैर्विजातीयैर्व्यभिचार्यादिभिरविरुद्धैः सजातीयैः स्थाय्यन्तरैरित्यर्थः। अतएव कन्यारत्नार्थितया महामांसा
दिविक्रयप्रसंगेन मालतीमाधवे श्मशानोक्तजुगुप्सापि रतिमेव पुष्णाति। आत्मभावमिति। आत्मास्वादविषयतामित्यर्थः। विरो
श्लोकः बलवत्ता निष्ठा। मनोनुकूलार्थविषयकसुखात्मकसंवेदनं रतिः। विकृतवाग्वेषादिविषयकं ज्ञानं हासः। अनौचित्येन प्रवृत्तियोगे सति
पुनस्तत्त्वाद्यपसाकृतानिश्चयः। अपकारित्वेन प्रतिकूलं ज्ञानं क्रोधः। मयेदं कार्यमित्यध्यवसाय उत्साहः। भयहेतूपनिपाते तत्परिहारा
नर्हलाघवज्ञानं भयं। सदोषपदार्थगोचरं निंद्यत्वप्रकारकं ज्ञानं जुगुप्सा। लौकिकसीमातिक्रांतत्वेन ज्ञानं विस्मय इति। यदि त्वेक एव स्थायी।
तिपद्यस्तदा तत्तज्ज्ञानोपनीतास्वादोद्बोधिनया यदा तत्तज्ज्ञानाभिव्यक्तस्थायिनि भासते तदा रत्यादिसंज्ञां तत्तदाकारेण परिणतो ल

१३

मत इत्यनानुपपत्तिः। न च विषयत्वाना त्वयं स्थायि नो ज्ञानस्य निर्विषयव्यापत्तेः। स्वचिन्मयत्वांगीकारात्। विषयानुपरक्तत्वेन
सूक्ष्मो न तास्वतरस्तन्यदेव तत्। न च स्थायिन एकत्वे रसत्वे द्वानुपपत्तिः। तथात्वे विरसत्वस्यनानात्वात्। न हि स्थायिमात्रं रसो
पि तु व्यंजकः। व्यक्तिस्तु तत्तद्विभावादिभिः। न ज नितत्वयानानात्वे न रसो पि नाना। यथा हि सुवर्णत्वाविशेषेपि कटककुंडलयो
स्वादिकारयोर्भेदस्तथा स्थायित्वाविशेषेपि व्यक्तीनां तद्विकाराणां भेद एव तस्माद्रसानामेकजातीयत्वं न त्वेकत्वं। अत एव
13 रसभेदायत्त इति भेदनायकभेदप्रतिनियतकष्टत्वादिदोषादयो पि तत्र तत्रोपपद्यंत इति। निर्वेद इति। विशेषेणाभितः
[illegible] व्यभिचारिण इति सामान्यलक्षणं। चारयंति स्थायिगतिं जयंती
कायेस्थायिनं चारयंतीति। व्यभिचारा इहे तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननं। बलस्यापचयो ग्लानिराधिव्याधिसमुद्भवः। आर्त
त्वर्थः। विशेषलक्षणानि तु। परोत्कर्षाक्षमासूया गर्वदौर्जन्यमन्युजा। संमोहानंदसंभेदो मदिरादिकृतो मदः।
श्रमः व्यायामो त्र श्रमः कामाय खेदः क्रिया। परोत्कर्षाक्षमासूया। सत्वत्यागाद्युत्तरकार्यो शक्या
मनःशरीरयोः खेदः क्रिया तिरस्कार्य श्रमः। क्रिया। धीद्वैप आलस्यं सुखसंविन्मदादिभिः। सत्वत्यागादनुत्कर्षो वा
देहेपि मुच्यते। प्रयत्न विकार्य स्यस्नुनिश्चितेति कथ्यते। सुखदुःखादिजनितो मोहश्चित्तस्य मूढता। स्मृतिः पूर्वानुभूतार्थ
विषयं ज्ञानमुच्यते। अभीष्टार्थस्य संप्राप्तौ स्पृहापर्याप्तता धृतिः। चेतो निमीलनं व्रीडा स्तब्धत्वकार्य क्रियादिभिः। आलस्य
कारान परावेक्षा चपलता व्यते। मनः प्रमोदो हर्षः स्यादिष्टवाप्तिस्तथादिभिः। आदराति यथा चेतस्यावेगः संभ्रमो मतः।
क्रियास्वपाटवं जाड्यं चिंतोत्कंठाभयादिभिः। गर्वोभिद्यो वामवज्ञानमात्मसंभावनादिभिः। विषादश्चेतसो ग्लानिरुपायाभा
वनाशयोः। उत्कंठेष्टानवाप्तौ वाभिलाषः स्यान्न दाघये। निद्राव्यापारवैमुख्याभिः क्रियाणां श्रमादिभिः। आवेशो ग्रहदुःखा
घेरपस्मारो यथाविधः। निद्रादिजनितं सुप्तमिंद्रियाणां निमीलनं। निद्रापगमहेतुभ्यः प्रबोधश्चेतनागमः। क्रोधः कृताप
कारेणुस्थिरोमर्षत्वमभ्युते। अवहित्थं तु लज्जादेर्हर्षाद्याकारगोपनं। विदुषण्डिदुपारुष्य मुग्रतामपकारिणि। राज्ञो का
थनुसंधानाद् दर्पनिर्यारणं मतिः। चिरहादेमनस्तापः शरीरातंकदो मदः। उत्कंठाहर्षयौकादेरुन्मादश्चित्तविप्लवः।
ग थनुसंधानादर्थनिर्धारणं मतिः। ऊहो वितर्कः स्यात्संशयः पदार्थेषु यथा मतिः। मरणं तु प्रसिद्धमेव। विभावल
त्रासश्चित्तचमत्कारश्चाकस्मिकभयादिभिः। ऊहो वितर्कः। विभाव्यंते त्वेहि
लक्षणं तु। वह्यो वा विभाव्यंते यार्गगामिनया त्मकाः। अनेन नयुस्मात्तेनार्थविभावा इति कीर्तिताः। इति। विभाव्यंते त्वेहि सामाजि
जो केरामादिगतरतिभावादीनामनुमापकाः सीतादयस्तेरेव काव्यनाद्यनिवेशितेः साधारणत्वेनोपस्थिताः सामाजि
करत्वादिभावा आस्वाद्यं कुर्वो न्याः क्रियंते इत्यर्थः। अनुभावलक्षणं तु। अनुभावो विकारस्तु भावसंसूचनात्मकः
इति। स्थायिव्यभिचारिभावसंसूचना त्मकइत्यर्थः। इति केचिदाचक्षते। किं विस्तारेण नादिव्यापारवत्वादि त्याहदिवदता

।धिभावनानुभावन संचारणाव्यापारवत्त्वं विभावानुभावव्यभिचारिलक्षणां करोति तमेवातः कंठतो नोक्तं। काव्येशानां साव
त्रमं निवारयन्नाह निर्वेदस्येति। अलौकिकरसमधिकृत्य प्रवृत्तशास्त्रप्रवृत्तो निर्विण्णस्य च तत्रानधिकार इत्यप्रसंगस्तथा
य व्यनुरुक्तं। स्था। यित्वात्तिधानार्थं स्था। यिप्रकरणानुद्दिष्टस्येति शेषः। तेन क्रोधस्तु पामवस्य स्थायित्वेपि न कथं प्रथमाभि
धानमिति निरस्तं। तस्य स्थायिप्रकरण एवोद्देशात्। इदमुपलक्षणं। अन्येपि स्थायिनो रसान्तरेषूपादीयमाना व्यभिचारितां
भजन्ते। इयान् विशेषो यन्निर्वेदस्य व्यभिचारितया प्रसिद्धिरन्यैर्ना स्थायितया। स्थायिनश्च सर्व एव व्यभिचारिणो व्यभिचारिण
श्च सर्व एव न तथेत्यपरो विशेषः। तदिदं वस्तु तिसमास्यातां स्वनामतः इति। नन्वेवमितररसवच्छान्तस्याप्यभिनेयत्वे अष्टौ नाट्ये
रसाः स्मृता इति विरुध्येतेति चेत्। न। शान्तस्य निवृत्तिप्रायतया रसत्वेन रस्यप्रवृत्तिपक्षतयाऽभिनेयस्य प्रवृत्तिनियतत्वेन शान्तोऽ
नभिनेय इतरे त्वभिनेयाः। अत एव च सकामशान्तस्य जीमूतवाहनस्य प्रवृत्तिसत्त्वात् स्वयं धनायकत्वमुपपद्यते। एवं च शान्तानुभा
वो पुनरागमनादिरपि प्रायस्त्वनभिनेय एव तथापि तद्वदपि सकामशान्तानुकृताये चाभिनेयं निःकामशान्तस्य तु ह्लादेरननुकरणीयत्वात्। एवं च
नाट्ये काथिकी नवरसत्वप्रसिद्धिरन्तमूलैव। देयादीति। मन्मथाननुगततरत्रिरित्यर्थः। तेन नाननुगमो न वा परमेश्वरस्य पार्वती
।विषयारतिः शृंगारत्वास्तायमवगाहते। इति द्रष्टव्यं। उपलक्षणमिदं रसतापत्तेः प्राकृतानां विषया भाव एव न रसः। तदिदमुक्तं व्य
भाव कोति। काचिदिति वदतास्याध्यं तरस्य नस्थायितया व्यक्तिरिति सूचितं। एवं च ज्ञानस्तु स्वस्वरूपः स्थायी को भिन्नभिन्नविषयकोपयोगा
तो नन्वदचाप्यतां भजन्नपि शृंगाराभत्वेनाविर्भवति न तु रसां तथात्मतया किंतु भावतयैव तत्रैव च हास्यादिव्यपदेशाः। इति निरस्तं।
आविर्भावरुनुसत्त्वात्। अन्यथा शृंगाराभत्वयापि नाविर्भवेत्। यदि निगमकालावाञ्छा। हरस्य धर्मिति। योगमूहितयोऽपः। दृष्ट्वा
घल। योगश्चात्र कृष्णलाभः। तथाच योग्यतामत्र लभ्यतामाहूतोमित्यर्थः। एषाहीति। यद्यपि वीरचरिते जनकस्य यमुक्तिस्तथापि विद
शारथत्वमारोप्यैतदुक्तं। अत एव कश्चित्तु स्तबकेभ्नोकोयं नास्त्येव। जाने कोपपराङ्मुखीति। नयत्वामालिरव्यैव्यनेन सह विशेषा
नासूयाव्यंजकत्वं विप्रलंभव्यंजकत्वं वास्यामतलं को विशेष इति वाच्यं। रसास्तयावध्यारकव्यंजकानुप्रवेशात्तदनौचित्यसकरस
भयातुल्यसामंजस्यात्। अनौचित्यप्रवृत्ता इति। अत्रानेककामुकविषयमभिलाषमनुचितं स्फोम इति वक्तृव्यापारोपादानं व्यनक्ती
त्यर्थः। स्फोम इत्यादीत्यतकुलासंविज्ञानो वक्तृश्री। हित्तनाचेष्टकादिलक्ष्यते। तस्य नायिकाव्यापारत्वाभावादिति समर्थ्यं। नन्वेकस्मि
न्नेव वस्तुनि वक्तृव्यापारोपादानं नानुचितं तु कथमाभासतेति चेत्। न। वक्तृव्यापारोपादानाभिप्रायात्। प्रकृते च यद्यपि सनेन चहूना
मे चालें यन त्वेनोपादानात्। अन्यथायमित्युपादाय नरमले मृगयसे स्फोम इत्येतावन्मात्रमुच्यते। मदननगरीव्यामंत्रणापदमपि
सर्वसंवरणीयत्वं व्यंजयद्धेतु विषयोपादानमेव व्यनक्ति। अत्रेति। परस्त्री। विषयतयेति शेषः। अत्रच रसाभासत्वेपि व्यभिचार्या

14

घसं वलनदृस्यायां साच त्वात्संभ्रमस्यापि भूत प्रवर्द इत्याभासइत्युच्यते। सांप्रदायिकास्त्वाहुः। नपात्रे पुंतिर्यक्कला यकप्रतियोगिकौ तौ कुच
भा पदार्थेषु नमांसं विजा। न तद्रतिकं उपासरतासं यादान्तेषामन्या। तासत्वे नगणनं कुर्वन्ति। यस्तु तस्यानौचित्यमात्रमेवाभीष्टं मतं तन्मते मासा स
ताप्रयोजकं। तिर्यगादौ त्वनौचित्यात्तावाद्रसवदुवनलदाभासः। अतएव इतिकारोक्षीवालंगे स्यादौ तिर्यग्विषयतया तत्समानं कं मित्रे कापि
गतइत्यादौ च विप्रजैस्तु मुधा जहार। अतएव यास्य शानेक कामुकविषयरतौ रसाभासत्वेपि पाउवेषुद्री प्रधानतथा। स्वस्ति याम। वि
ष्णौ का यानि च्छायां शृंगारपदानमाभासमौचित्यानौचित्याभ्यामपसेयं। सांप्रदायिकैस्तु सूचितदर्श्या। अयत्वमपि अनौचित्य प्रवर्तनि:
14 त्तिप्रवत्याग विनं। रसानौचित्य प्रवर्त्तसाधकमोत्तम्मेवाभागमात्र दाभासताप्रयोजकमेव ननु वाच्यवाचकानौचित्यवद्रसभंगहेतु
रितिविस्तावनीयं। यद्यपि काव्यनाट्यप्रयोगदर्शिनाभ्यां विभावादिसाधारण्यविज्ञानेसति सामाजिकानां रतीयस्या विषये किं रूपसौ किंकर
सः स्वतोनाभासस्तथापि साधारण्यप्रतीतिप्रयोजकं काव्ये वर्णितेयत्रानौचित्य प्रतिसंधानं तत्र तद्धर्मरसस्याभास व्यवहार इति ध्येयं।
भावस्य शांतिरिति। विरुद्धभावोदयाद्विना भूता शांतिः। शांत्यपि विनाभूतो विरुद्धभावोदयो भावशबलता उदयौ। द्वयोरस्तु त्यपि वर्यत्वे संधिः।
शांत्वक्त्वद्वयोः करं चित्तत्वे सावलंता। तद्योदाहरणाएव स्फुटं। उसि कस्येति। लब्धप्रतिष्ठतया मन्यह काररज्जु त्सोके स्वाद्धतइत्यर्थः। ननु भा
वोदयादिवद्भावस्थितिः कुतो नोक्ता इत्यत आह भावेति। तथा च भावोदाहरणतामेव तदुदाहरणानि भिन्न पृथगुक्तानि भावाः। ननु कौ
दाहरणेषु रसस्य स तथा कथं तावोदाहरणत्वमत आह मुख्य इति। राजेति। विवाहनक्रियायां प्रधानस्यापि रसोऽप्राधान्यं अप्रधा
नस्यापि भृत्यादेः प्राधान्यमप्यपक्षे त्यर्थः। लक्ष्यक्रमध्वनिं निरूपयितुमाह अनुस्वानेति। अनुस्वानमनुरणनं तदाभस्तत्सदृश इत्यर्थः।
सादृश्याते नाभिधावृत्तितया व्याख्याङ्गदृः। तत्र बाधेन विच्छेदादनुरणनाभावात्। शक्तिपदं शब्दादेरप्येकमभिहितं हृदयपरश्रुतत्वादनुक्तो विधेयमित्य
र्थः। यद्यपि शब्दार्थयोरेकव्यञ्जकत्वे परस्परं जनकत्वं कथमिति नार्थविभागस्तथापि प्राधान्याभिप्रायेणायं। तत्रापि शब्दस्य शिष्ट
त्वस्य सहत्वे शब्दप्राधान्यं परिवृत्तिसहत्वे त्वर्थप्राधान्यमुभयसहचलने तूभयप्राधान्यं। आद्ये द्वितीये वाक्ये त्येकोऽसंगतवनो द्वि
बाधेन शब्दशक्तेरभिधाया विच्छेदात्। यद्यपि च वचसामालक्ष्यक्रमध्वन्युदाहरणेषु यत्र क्वचिद्ध्वनिरूपणमप्यस्ति तथापि
भूम्ना व्यपदेशा इति लक्ष्यक्रमत्वमुक्तं। शब्दशक्तिमूलं विभजते तत्रेति। प्रधानत्वेनोपसर्जनीकृतशब्दार्थत्वेन। अन्यथा यथा
श्रुते यच्चालंकारस्यार्थस्याभिधया प्रतिपादनं तत्रातिव्याप्त्यापत्तेः। नन्वलंकारोपि वस्त्वेव वस्तुत्वस्य केवलान्वयित्वादत आह अ
नलंकृतमिति। तथा च चित्राच्चित्ररूपवस्तुभेदाङ्गेद इत्यर्थः। उच्छ्वसितीति। कालकरवालेमत्तदन्तुधारारूपं जले तस्य वाहप्रवाह
मुग्धोऽस्य देवे नराशाजरको जितगाजितेन तेजोयुक्तसिंहनादेन सकलपयरतोसविस्मितेनैव संग्रामे रिपूनां ज्वलितः प्रतापः श्री
मित इत्येकः। कालकरः श्यामरुचिर्वा कोनवोदितो महानंबुवाहो महामेघस्यामुग्धोस्य देवेनेन्द्रेतो जितगाजितेन रिपुत्कार

तोजलस्पर्शीततयोक्तत्वया आतपएवपरिपुष्टस्यरतोरादेमलानयमातपद्दतिजनकस्तकृतेसतिप्रतापःप्रकृष्टतापःशमितइति
द्वितीयोर्थः। ननुकाजोचेरिसंहर्तायःकरवालरूपोमहांबुधाहस्ताम्बुधेरित्यर्थः। तथासतिदृष्टयगार्थद्वयाप्रतीत्यारूपकेतोपम
तार्थसिद्धे रूपमोद्दाहरणतानस्यात्। असंबद्धेति। अपि चादितार्थपरत्वमित्यर्थः। नन्वजश्लेषसत्वान्नोपमाकल्पनमतआह आकर
तोकेति। उभयतात्पर्यग्रहपदभ्रेषसंभवादत्रचतदभावान्नश्लेषइति। ननुकेवलंश्लिष्टपदैरेवोपमेयकल्पनइतिनियमोऽपित्वं
अकृतैरप्यलंकारांतरमपिव्यज्यतइतिदर्शयितुमाह तिग्मेति। नन्वत्रविरोधाभासोवाच्यएवनकथमतआह अत्रेति। तथाहिप्र
थममेकपदेनश्रामातिकार्यप्रतीतौसत्यांपश्चाद्विपदताप्रतिभासेनविरोधाभासव्यंजनात्। अतएवपदद्वयपरिवृत्तिसहत्वेनशब्द
शक्तिमूलतापिनहितिग्मरुचिरप्रतापद्दत्यत्रतीव्रताशोभनप्रतापद्दत्यत्रापिद्विपदतानुसंधानेविरोधाभासोनस्फुरतीति
तात्पर्यं। अमितइति। अत्रामितसमितयोरहितसहितयोश्चविरोधाभासः। व्यतिरेकइति। अंगपदविशेषः। उपमानाकारोरूपमे
यस्यभ्रूलतिनोवेत्तत्पप्रतीतेःभ्रूविनिकुंजा। तितिरस्थानीयश्लिष्टत्वात्परिवृत्त्यसहत्वं। तत्रश्लेषत्वेनिकृष्यवस्तुशास्त्रविशेषश्च
कल्पायतुःपच्छिवंदकलायमिति। कुष्ठांचित्रपटश्चेति। नन्वत्रकार्येऽभ्यन्तदत्सनुपपन्नेतस्येयात्रालंकार्यत्वादित्यतआह अलं
कार्यस्यापीति। यथाहिउत्पादइत्राशायांश्रमणत्वंब्राह्मणत्वंचनैकत्रविरुद्धं तथात्राप्यनुप्रासाद्यलंकारापेक्षयाऽलंकार्यत्वंप्रतीयमा
नस्यजादिविषयरत्यपेक्षयाऽलंकारत्वमपिनविरुद्धं। ननुश्चतद्दूषयतिः ब्राह्मणश्रमणत्वाद्येनेत्याकारविरोधात्। श्रमणत्वदृशा
यामपिब्राह्मणतात्यापरित्यागात्। भूतपूर्वगतेस्तत्सौप्रतिकासत्त्वमादायप्रवृत्तेः। आचस्तत्रापिनतुतद्दूर्वगतिमेवपदतितन्प्रती
त्युपरोधेनउपमाव्यंजनदशायांतदलंकारत्वाननुपपत्तेः। किंतुतदनंतरराजादिव्यंजनदशायामितितात्पर्यार्थः। ननुपाद्यव्यंज
कत्वोदाहरणायकरतोश्लिष्टपयोधरपदमात्रव्यंजकत्वोदाहरणमयुक्तमितिप्रस्वरसादाहरणानिरिति। अत्रेति। विरुद्धतयाप्रतीनायपी
त्यर्थः। इदानीमर्थशक्तिमूलंविभजते अर्थेति। तथायत्रिःप्रकारपद्येप्रत्येकंवस्त्वलंकारयोर्व्यंजकतयावस्थितानितेषांचप्रत्येकसजा
तीयथंप्रभेदाद्द्वादशविधत्वमित्यर्थः। ननुस्वतःसंभवीतदन्यश्चेतिद्विविधएवार्थस्तत्रकुतस्त्रैविध्यमतआह इति। द्विविधइति। च
थावस्तुतःसंभवन्यत्वेनैकोऽपिविपश्चिद्वशादुक्तरूपद्वयंतयाद्विविधइतित्रिविधइत्यर्थः। नचनिबद्धभणितिनिष्पन्नोविक
चिभितानिनिष्पन्नएवेतिचेत्। सत्यं। प्राधान्याप्राधान्याभ्यांकविभंगीतितेभेदविवक्षितत्वात्त्रिधाविभागात्। स्वतंत्रेच्छायाअपर्य
नुयोज्यत्वात्। काचित्तुतेनायंद्वादशात्मकइत्यनंतरंइदंप्रथमकल्पितःस्वतःसंभवीतिद्विविधोर्थइतिदृष्टान्तबाधकः। पाठः। यद्यपि
कावस्यसालंकारत्वाद्वस्त्वलंकारयोरेकत्वेऽपरस्यापितथात्वमावद्रूपकंतथापिप्राधान्यमाश्रित्यायंविभागइतिबोध्यं। इदं
उपुनरत्राचघातव्यं। यत्कविसमयसिद्धमसत्यमपिकाव्येप्रौढोक्तिसिद्धमादरणीयंकीर्तेःशोभाधवलतरत्वाच्चंद्रकीर्तेःस्वपामहा
त्यपदाधुनिकन्यप्रयातोरजसा। ... भयाद्विवक्षु। व्यवहारस्तत्समुचितएववर्णनीयोऽन्यथाऽसंगतताप्रतिभा
सेननायकवदितितव्यमितिक्षपदेशोकाव्यंनवयव ... पिनोक्तिस्वरूपायोग्यतानिबंधनश्चासमता

मधुमती

आतेरंचेतित्य

नर

प्रतिभासत्र उपदेशो विरोधी तेन वीरस्वरितेः स्वभावकर्षिते पिका। निवधेः सत्यनाप्रतिभासे पिनदोषः। युध्यमानया। निवृये वि दारुभ्रमये;
स्वस्वरूपयोगपत्वात्। अत्रेति। विरोधालंकारेण वास्तविकविरोधमूलासंगत्यलंकारेणोपपः। स्याधरनिर्दिशो वैरविनितौ क्रमो
चनयोः कार्यकारणयोः वैयधिकरण्यनिर्देशाद्विरोधस्य स्फुटत्वात्। तुल्ययोगितेति। अत्र तुल्ययोगितापदेन समुच्चया
लंकारोपि च इति। अपर निर्देशान वैरिव्यापादनक्रियायोगपद्यप्रतीतेः। अत्रेति। एककर्तृका लिंगने पीडया भ्रमाभावादिति
६ भावः। किंविचदने यत्र कश्चिद्दनां गुरुहे यद्वा चिनिचेष्टा यथा सातचेत्यर्थः। निश्वासे इति। प्रकृता निम्रा यमिदं तनुव्ययपद्मचिह्नं कु
विकुनिःश्वासः प्राप्तो भार्या इति पाठः स च युक्तः। अत्रेदेति। अत्रेद्वन्द्वतारकारूपामापदानां। हित्वा त्वपरिहृत्य सहत्वं मन्मथानन्दपदाही
नीयपरिहृत्ति सहत्वामभ्रमनयमूलत्वं। यद्यप्यत्र शक्तिमूलोपि प्राप्तुं कर्ते दाः संतर्पनि तथा पिरा स्त्रार्थाभियत्रा नकथत्वेनेवयमुक्तो।
पदद्योत्येनेति। यद्यपि यत्रैकं पदं व्यंजकं तत्र पदान्तरा त्यपितथा तथापि प्राधान्यादित्यभिप्रायेणेदं द्रष्टव्यं। तदिदमुक्तं प्राधान्येन ध्वनपदे
न व्यज्यत इति। अत्रेति। सर्वत्र सामान्यविशेषभूतावाचः संबंधः सहृदयत्वनिर्जितत्वसंपत्तिमत्यप्रतीतयश्च यथाक्रमं प्रयोजना नियच
प्यनेकान्यत्र पदानि संतितथापि ते बांप्रत्येकमेव व्यंजकत्वात्तत्पदं व्यंग्यव्यंजकमुक्तं। अत्रेति। आकुंचितप्रहृष्टनितन्त्रयते कार्यकारणाभ्या
वः संबंधः तन्निबंधेनानिमतकारित्वं व्यज्यते। अत्रेति। प्रकाश्यते एवं वतदेतिपदेन प्राधान्येन संभोगशृंगारो व्यज्यते। मुग्धे मुग्धतयैवे
ति। वधानं अयुक्तामित्यत्र अल्पकइतिप्रकातिवत्भावः। भीतानना भीतकनायकचेष्टाविशिष्टाननेत्यर्थः। अत्रेति। यद्यपि नीवैः शंस
नविधानस्य युक्तावस्करूपानवतस्या अलंघकमत्वमितितत्प्रकरणे तद्यंगपत्वमुदाहर्तुमुचितं तथापि तयाविप्रलंभशृंगारोऽ
नुरणनन्यायेन व्यज्यते तदानीमन्यहेतुकत्वयस्यानावात्। मुक्तिमुक्तिकदिति। मुक्तिः स्वर्गादित्योगः कांता दित्योगश्च मुक्तिरपवर्गः
खेदान्ता वस्था। एकांतोऽद्वैतविधिचिकदेशश्चासमाद्देशो यजेत्यादिनियोगश्चाक्षानेव। संश्वासावागमश्चेति सदागमो वेदः सत् आगम
नेच। काचिदिति। संकेतदायिस्कनिरूपं चास्थितिरोपः। युस्वयवा व्यंजनये त्यर्थः। एवं चात्राप्रस्तुतवेदप्रशंसया प्रस्तुतस्य संकेतदा
नेच। काचिदिति। अत्रेति। अतिशयोक्तिपदसमाख्यावलेनालंकारसामान्यवाचकमपि अ
पिनः स्तुतिर्व्यंग्या। अभिधानियमनान्ने श्लेष इति द्रष्टव्यं। अत्रेति। अतिशयो। अतिशयोक्तिपदेन...
यिनः स्तुति व्यंग्या। अभिधानि यमनान्नेश्लेष इति द्रष्टव्यं। इदानीं प्रसंगविषये तद्वतारात्। दृश्यत इति वियोगदुःखोपनीतेण जनकयुक्तेन समस्तपातकजन्यदुःखोपभोगस्य ता
त्रविशेषालंकारचिह्नोषपरं प्रसंगविषये तद्ववतारात्। पातकनाशेन समस्तपातकनाशप्रतीतेर्विशेषालंकारद्वयमशेषपदद्योत्यं। एवं च तादृशाह्लादभोगजन्
द्वियोगदुःखजनकतयापातकनाशेन समस्तपातकनाशप्रतीतेर्विशेषालंकारद्वय...

। तस्मात्। अत्रेद्वागसंधि इदं विशेषणं। तेन हृदयेनैवेति गम्यते। कीदृशेन हृदयेन संतापकदर्थितेन। हारस्य गाढालिंगनांतरायतया, यः संतापस्तत्कदर्थितेनेत्यर्थः। गाढालिंगनांतरायत्वेन तस्य हेतुत्वमुक्तं विशेषणयति स्तनहरेति। हारेति। हारेत्यासक्ता लिंगने स्तनयोः पीडामाकूदित सिसंधिः। एवं यवि परीतरतायुस्थियमिति बोद्धव्यं। अत्र गृहद्वारप्रवेशनादेः ध्वतः संलग्नत्वात्कनिनिचद्रो ढोक्तिमात्र निष्पन्नत्वं नास्तीत्यस्वरसाद्दाहयथावेति। एवमिति। वाक्यप्रकारस्यादृष्टादत्रापदप्रकारस्य सद्भद्दरात्तेदार्ढ्या मिलित्वा पंचत्रिंशद्द्रव्यमित्यर्थः। प्रयं घेपीति। कियत्यपि वाक्य इत्यर्थः। पदेके ति। आदिपदाद्वाक्यतदात्तासाद्धिपरिग्रहः। वाक्यस्य पदघटितत्वात्पदस्य सुप्तिङन्ततात्मकतया प्रकृतिप्रत्ययघटितत्वान्नयो श्रय वर्णघटितवतया यत्र वाक्यस्य रसादिव्यंजकता तत्र सर्वेषामपिव्यंजकतापत्तिरिनाक्तस्य वाक्यस्यैवालाया इ। तथाव कचित्कस्यचित्प्राधान्यं विवक्षित्वा वाक्यादेर्व्यंजकत्वव्यपदेश इत्यत्र तात्पर्यं निन्वितिः। शीलतइत्यादिपदैः प्रकर्षमात्रप्रतीतावपि सर्वोत्कर्षप्रतीतेः तदप्रतीतौ चकरस्य सापि द्वेषाचुचवनस्य करस्कगनावेत्तयाचुं वनस्थगनस्यो। कर्णेनिप्रवीयेतेति भावः। लोकोत्तरेति। करादिनास्कगनमात्रं चुवने नस्थगने क्रीडोचितत्वमक्प पन्नमिति लोकोत्तरत्वं। अत्रोत्तमदेवतादिभयसंभोगवर्णनस्यानौचित्याद्दृत्तासत्वं। नकुद्वारादीनीति। बुद्धिपूर्वकागमने हि वथायुज्यते। तथा चपदानीत्यनेन किंकर्तव्यताव्यामोहप्रयुक्तत्वं गमनस्य युज्यते। यद्वा द्वारपर्यंतगमने सहि हृक्ततया नुरागश्चोपित्यंस्यादिति पदानीत्यनेनानुरागाधिक्यं प्रतीयते। अत्रेति। कर्तरिप्रत्ययविधानात्क्तलिकारवाच्यः। साध्यमानत्वं तु व्यंग्यं। एवं निष्ठेत्यत्रापि प्रातिपदिकार्थादिसुपो वाच्यं लिङ्गत्वं तु व्यंग्यमेव। तथा औत्कप्रत्ययस्यापि भावादिरर्थोऽतीतत्वं व्यंग्यं। जघ्न्यादिति। नन्वेवं रसः नजघ्नीवाच्य एव तत्कथं व्यंग्य इति चेत्। न। शोचिकणद्या एवं वक्ष्यादिज्ञानसहकारेणानादरव्यंजकत्वात्।

काव्यप्रकाशटीकायां मध्यमतपांचत श्री ह्लासः

१६